# केरलपाठावलिः
# संस्कृतम्

**अष्टमी कक्ष्या**

अक्कादमिक-संस्कृतविद्यालयानां कृते

## KERALA READER
# SANSKRIT

**STANDARD VIII**

FOR ACADEMIC AND SANSKRIT SCHOOLS

**Government of Kerala**
**Department of General Education**

**State Council of Educational Research and Training (SCERT), Kerala**

**2025**

# राष्ट्रगीतम्

जन-गण-मन-अधिनायक जय हे
भारत-भाग्य-विधाता
पंजाब-सिंधु-गुजरात-मराठा
द्राविड-उत्कल-बंगा
विंध्य-हिमाचल-यमुना-गंगा
उच्छल-जलधि-तरंगा
तव शुभ नामे जागे, तव शुभ
आशिष मागे,
गाहे तव जय-गाथा।
जन-गण-मंगल-दायक जय हे
भारत-भाग्य-विधाता।
जय हे, जय हे, जय हे,
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम् । सर्वे भारतीयाः मे भ्रातरः । अहं मम राष्ट्रे स्निह्यामि । तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि । तद्योग्यतां सम्पादयितुं सदा यतिष्ये च । अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च । विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च । मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम् । राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि ।।


**State Council of Educational Research and Training (SCERT)**

Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in, email: scertkerala@gmail.com
Phone: +91 471-2341883, fax: +91 471-231869
First Edition: 2025
Printed at : KBPS, Kakkanad, Kochi-30

©Department of General Education, Government of Kerala

# सन्देशः

प्रियच्छात्राः !

अष्टमकक्ष्यायाः संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। कविता, कथा, विवरणम्, उपन्यासः, सम्भाषणम् इत्यादिभिः व्यवहाररूपैः समाकलितं भवतीदं पाठ्यपुस्तकम्।

विज्ञानविनिमय-उपाधयः (ICT), राष्ट्रिय-कौशल-योग्यता-प्रारूपं (NSQF), नूतनानि पठनतन्त्राणि च पुस्तकेऽस्मिन् परिगणितानि सन्ति। माध्यमिकशिक्षायाः आरम्भः अष्टमकक्ष्यायामेव इत्यतः अनुस्यूतपठनाय प्रेरणादायकाः अंशाः अपि अत्र अन्तर्भाविताः।

स्वतन्त्रवाचनाय स्वतन्त्रचिन्तायै शास्त्रावबोधाय विशकलनात्मक-चिन्तायै सर्गवैभवाय च अवसराः पुस्तकेऽस्मिन् समाकलिताः। भाषायाः प्रयोगोपाधिमधिगन्तुं तद्वारा रचनाप्रवर्तनेषु भागं ग्रहीतुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतभाषायाः विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यति इति आशासे।

भवदीयः

**डा. जयप्रकाश आर्. के**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXT BOOK DEVELOPMENT TEAM

### Advisor

**V Madhavan Pillai**, Asso.Professer in Sanskrit (Rtd), Govt.Womens college, Thiruvananthapuram

### Chairperson

**Dr.K K Sundaresan**, Former Registrar, Kerala Kalamandalam, Thrissur

### Experts

**Dr. G Sahadevan**, Rtd. Professor, University College, Thiruvananthapuram
**Dr. P V Sreenivasan**, Asso.Professor, Govt.Ayurveda College, Thrippunithura

### Participants

**Ambili A N**, HST Sanskrit, SDPYBHS, Palluruthy, Ernakulam
**Jose C V**, HST Sanskrit, Holy Cross HSS Mapranam, Irinjalakuda, Thrissur
**Dr. Nidheesh M G**, HST Sanskrit, GHSS Chembuchira, Thrissur
**Premanandan K M**, HST Sanskrit, GHS Karakurissi, Mannarkkad, Palakkad
**Dr. Sajithakumari P**, HST Sanskrit, St Ignatius VHSS Kanjiramattom, Ernakulam
**S Udayakumar**, HST Sanskrit, TTTMVHSS, Vadaserikkara, Pathanamthitta
**Vidhyalakshmi M**, HST Sanskrit, GBHSS Tirur, Thekkummuri, Malappuram
**Vidya K V**, HST Sanskrit, GGVHSS Irinjalakuda, Thrissur

### Artists

**Anju Vijayan S**, Illustrator/ Graphic Designer, Thiruvananthapuram
**Anoop Shija**, Illustrator/ Graphic Designer, Kollam
**Prasad Kumar K S**, HST Art, GHSS Erimayur, Palakkad
**Shaji Mathew**, Artist, Pathanamthitta

### Design and Layout

**Ullas U G**, HST Physical Science, CBHSS Vallikunnu, Malappuram

### Academic Co ordinator

**Rehna Mol R**


Research Officer, SCERT, Kerala

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्
**State Council of Educational Research and Training, Kerala**

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| 1. | आरण्यकम् | 1. ग्रामकन्यका | कविता | 8 |
| | | 2. वयमेव संरक्षकाः | कथा | 15 |
| | | 3. इति वार्ताः | वार्ता | 24 |
| 2. | आनन्दकम् | 4. गद्दिका | यात्राविवरणम् | 34 |
| | | 5. धीरो दूतः | नाटकम् | 43 |
| | | 6. सव्यसाची | काव्यांशः | 52 |
| 3. | आधेयकम् | 7. समे समाः | अभिमुखभाषणम् | 65 |
| | | 8. राराज्यमानं ध्रुवतारकम् | जीवनचरितम् | 73 |
| 4. | आदर्शकम् | 9. निकटस्थः कः? | कथा | 83 |
| | | 10. अहन्यहनि बोद्धव्यम् | सुभाषितम् | 90 |


## पठनप्रवर्तनानां सूचकानि ।


लेखनम्



दैनिकी


आलपनम्


टिप्पणीलेखनम्


संभाषणम्


समाहरणम्


अग्रिमपाठसम्बन्धः


वार्तावाचनम्


पट्टिकाकरणम्


क्रमीकरणम्


परिवर्तनम्


नाटकावतारणम्

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കുതന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

एककम्

# १ आरण्यकम्



## आमुखम्

अष्टमकक्ष्यायाः संस्कृतपाठ्यपुस्तकस्य प्रथमम् एककं भवति आरण्यकम्। एककेऽस्मिन् प्रकृतिसम्बन्धिनः त्रयः पाठाः समाकलिताः सन्ति । प्रकृतिसंरक्षणस्य प्राधान्यं बोधयन्ती 'ग्रामकन्यका' नाम कविता, वनविभवसम्बन्धिनी 'वयमेव संरक्षकाः' नाम कथा, प्रकृतिदुरन्तान् प्रतिपादयन् 'इति वार्ताः' इति पाठश्च। एतेषां पाठभागानामध्ययनेन वयमपि प्रकृतिप्रणयिनः भवाम ।

पाठः १

# ग्रामकन्यका

## प्रवेशकम्

प्रकृतिसौन्दर्यं प्रकाशयत् चित्रं पश्यतु। सौन्दर्यं कथं प्रतीयते? तस्य संरक्षणम् अस्माभिः करणीयं खलु। तदर्थं किं किं कर्तुं शक्यते। प्रकृतिसंरक्षणप्रतिपादिकां काञ्चन कवितां पठामः।

## आमुखम्

अस्मान् परितः अवलोकयामः चेत् प्रकृतेः मनोहारिताम् आस्वदितुं शक्यते। सूर्योदयः, मन्दमारुतः, मेघवर्षणम्, ऋतवः इत्येवं सर्वमपि प्रकृतेः लावण्यं प्रकाशयति। तदनुभूय महान्तः कवयः काव्यरचनाम् अकुर्वन्। तादृश्याः परिस्थितेः संरक्षणं समेषां दायित्वमेव खलु। अतः तत्प्रतिपादिकां कवितां पठामः।






पूर्वस्यां दिशि पर्वतराजः
कनकं तापयति ।
कोकिलपोतो मङ्गलगानं
मधुरं श्रावयति ॥

ग्रामसुतायै दर्पणवेषं
तनुते शैवलिनी ।
अञ्जनलेपं राति निकामं
रजनी ग्रामसखी ॥

श्यामपयोदो मुक्तकनीरै-
रवनिं तोषयति ।
पङ्किलपादो नाकसमानं
कुरुते ग्राममुम् ॥

कर्षणभूमौ काञ्चनचेलां
वयते दीपपतिः।
सौरभवाहो माधवमाल्यं
धरणीं धारयति ॥

सर्वमशेषं यत्नसमेतं
वसुधां भूषयति ।
तादृशभूमेः पालनकार्यं
कलयामो नियतम् ॥



## पदच्छेदः

| | | |
|---|---|---|
| कोकिलपोतो मङ्गलगानम् | = | कोकिलपोतः + मङ्गलगानम् |
| श्यामपयोदो मुक्तकनीरैरवनिम् | = | श्यामपयोदः + मुक्तकनीरैः + अवनिम् |
| पङ्किलपादो नाकसमानम् | = | पङ्किलपादः + नाकसमानम् |
| सौरभवाहो माधवमाल्यम् | = | सौरभवाहः + माधवमाल्यम् |
| कलयामो नियतम् | = | कलयामः + नियतम्। |

## विग्रहः

| | | |
|---|---|---|
| पर्वतराजः | - | पर्वतेषु राजा। |
| कोकिलपोतः | - | कोकिलस्य पोतः। |
| ग्रामसुतायै | - | ग्राम एव सुता, तस्यै। |
| ग्रामसखी | - | ग्रामस्य सखी। |
| मुक्तकनीरैः | - | मुक्तकम् इव नीरं यत् तत्, तैः। |
| पङ्किलपादः | - | पङ्किलौ पादौ यस्य सः। (कर्षकः) |
| दीपपतिः | - | दीपानां पतिः। |
| सौरभवाहः | - | सौरभं वहति यः सः। |
| माधवमाल्यम् | - | मधोः इदं माधवम्, तस्य माल्यम्। |

## पठनप्रवर्तनानि



### तालानुसारं बालकविताम् आलपतु।

श्रद्धेयाः अंशाः -

उचितः तालः

आलपनरीतिः

अवतारणशैली।



### अधो दत्तेन आशयेन युक्तं कविताभागं चित्वा लिखतु।

सूर्यः उदयते।

ग्रामे निर्मला नदी प्रवहति।

मेघाः काले काले वर्षन्ति।

कर्षकः ग्रामं समृद्धं करोति।

सूर्यप्रकाशे केदाराः सुवर्णशोभया राजन्ते।

वायोः आगमनेन पुष्पाणि भूमौ पतन्ति।

प्रकृतिसंरक्षणं कुर्मः।

श्रद्धेयाः अंशाः -

आशयावगमनम्

विशकलनसामर्थ्यम्

चयनसामर्थ्यम्।

**कवितां पठित्वा क्रियापदानि सञ्चिनोतु। तान्युपयुज्य नूतनवाक्यानि रचयतु।**

श्रद्धेयाः अंशाः -

क्रियापदचयनम्

आशयावगतिः

वाक्यनिर्माणपाटवम्।

**उदाहरणानुसारं मञ्जूषातः णिजन्तं रूपं चित्वा लिखतु।**

उदा - पाठयति, चालयति।

| |
|---|
| चोरयति, लिखति, कर्षयति, पतति, प्रेरयति, प्रवेशयति, गच्छति, नटति, नादयति। |

श्रद्धेयाः अंशाः -

प्रत्ययावबोधः

क्रियापदावबोधः

चयनसामर्थ्यम्।

**कविताभागात् भूमिः इत्यस्य पदस्य समानार्थकपदानि चित्वा लिखतु।**

श्रद्धेयाः अंशाः -

अर्थावबोधः

आशयग्रहणम्

चयनसामर्थ्यम्।

### कवितायाः आशयं स्ववाक्यैः लिखतु।

श्रद्धेयाः अंशाः -

अर्थावबोधः

लेखनसामर्थ्यम्

आशयग्रहणम्।

### परिस्थितिसंरक्षणस्य उपायान् सङ्घशः चर्चित्वा लघुटिप्पणीं लिखतु।

श्रद्धेयाः अंशाः -

भागभागित्वम्

आशयावबोधः

लेखनसामर्थ्यम्।

## अनुबन्धः

दिशः - पूर्वदिक्, पश्चिमदिक्, दक्षिणदिक्, उत्तरदिक्।

ऋतवः - वसन्तः, शिशिरः, हेमन्तः, शरत्, वर्षाः, ग्रीष्मः।

### पदनिर्माणम् - ददाति इति दः।

पयः ददाति इति - पयोदः।

जलं ददाति इति - जलदः।

तोयं ददाति इति - तोयदः।

वारि ददाति इति - वारिदः।

जलशब्दस्य पर्यायपदेन सह 'दः' इति योज्यते चेत् मेघः इत्यर्थकं पदं लभ्यते।

### धातुरूपाणि

तप् सन्तापे (भ्वादिः परस्मैपदी सकर्मकः अनिट् णिजन्ते कर्तरि लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | तापयति | तापयतः | तापयन्ति |
| म.पु. | तापयसि | तापयथः | तापयथ |
| उ.पु. | तापयामि | तापयावः | तापयामः। |

रा दाने (अदादि: परस्मैपदी सकर्मक: अनिट् कर्तरि लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | राति | रात: | रान्ति |
| म.पु. | रासि | राथ: | राथ |
| उ.पु. | रामि | राव: | राम: । |

## नामरूपाणि

शकारान्त: स्त्रीलिङ्ग: 'दिश्' शब्द:।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | दिक्,दिग् | दिशौ | दिश: |
| सं.प्रथमा | हे दिक्,<br>हे दिग् | हे दिशौ | हे दिश: |
| द्वितीया | दिशम् | दिशौ | दिश: |
| तृतीया | दिशा | दिग्भ्याम् | दिग्भि: |
| चतुर्थी | दिशे | दिग्भ्याम् | दिग्भ्य: |
| पञ्चमी | दिश: | दिग्भ्याम् | दिग्भ्य: |
| षष्ठी | दिश: | दिशो: | दिशाम् |
| सप्तमी | दिशि | दिशो: | दिक्षु । |

## व्याकरणविशेष:

पर्वतराज: – पर्वतराज: इत्यत्र समासान्तस्य ‘राजन्’ शब्दस्य अकारान्तवत् रूपं लभते। ‘राजाहस्सखिभ्यष्टच्’ इति सूत्रेण ।

## कोश:

दिक् – दिशस्तु ककुभ: काष्ठा आशाश्च हरितश्च ता:।

शैवलिनी – तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।

अवनि: – गोत्रा कु: पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ।

**प्रकृति: पाति पाल्या च ।।**

पाठः
२

# वयमेव संरक्षकाः



## प्रवेशकम्

वनस्य मनोहरं चित्रं पश्यतु। चित्रे के के सन्ति? वन्यमृगाः पक्षिणः लघुप्राणिनः च सन्ति। ते वनमाश्रित्य जीवन्ति। के के वनं दृष्टवन्तः ? वनस्य आवश्यकता का ? तस्य संरक्षणं के कुर्वन्ति ?

## आमुखम्

प्रकृतेः सौन्दर्यं सीमातीतमेव। पल्लवैः पुष्पैः फलैः चालंकृताः वृक्षाः लताः च प्रकृतेः सौन्दर्यं वर्धयन्ति। आवासव्यवस्थायाः आधारो भवति वनम्। सर्वे चराचराः वनमाश्रित्य जीवन्ति। वनं विना जीवनं सुकरं न भवति। अस्माकं सुस्थितये, वसुधायाः सन्तुलितावस्थायै च वनमुपकरोति।




कस्मिंश्चित् वने कश्चन मयूरः आसीत् । सः स्वयं सुन्दरं मन्यमानः इतरान् परिहसति स्म । 'मम बर्हाणि वर्षाकार्मुकमिव बहुवर्णोपेतानि भवन्ति । अहम् इव नर्तनं कर्तुं न कोऽपि शक्नोति' इत्येवं चिन्तयित्वा गर्विष्ठः सः कानने सञ्चरति स्म ।

एकदा कश्चन काकः वेगेन आगत्य एवमवदत् - 'अयि मित्राणि! कश्चन मानवः अस्माकं वनं नाशयति'।

वानरः - 'अहो ! कथम्'?

काकः - 'मानवः वृक्षस्य छेदनं कुर्वन्नासीत्। तत्पतित्वा मयूरस्य नीडं भग्नमभवत्। मयूरः दीनं रोदिति'।





तच्छ्रुत्वा गजः अवदत् – 'यद्यपि मयूरः  अस्मान् परिहसति तथापि सः अस्मासु अन्यतमोऽस्ति । अतः तस्य साहाय्यम् अस्माकं कर्तव्यमेव' इति । गजस्य वचनं सर्वे अङ्गीचक्रुः।

सर्वे पशवः एकीभूय मानवम् आक्रमितवन्तः। तेषाम् आक्रमणं सोढुम् अशक्तः सः प्राणरक्षार्थं ततः पलायनम् अकरोत् ।

सर्वे मयूरं समाश्वासितवन्तः । तस्य नेत्राभ्याम् अश्रूणि अपतन् ।

तद्दृष्ट्वा भल्लूकः - 'वनमस्माकं गृहं, तस्य संरक्षणम् अस्माकं दायित्वमेव । वनं विना जीवनम् अशक्यं खलु' इत्यवदत् ।

गजः अवदत् - 'साधु, द्रुमाः वनस्य आधाराः। द्रुमं विना वनं कथम्? तत्र वयमेव रक्षकाः भवेम' इति ।



**पदच्छेदः**

सीमातीतमेव = सीमातीतम् + एव

वनमुपकरोति = वनम्+ उपकरोति

तच्छ्रुत्वा = तत् + श्रुत्वा

अन्यतमोऽस्ति = अन्यतमः + अस्ति

तद्दृष्ट्वा = तत् + दृष्ट्वा ।

**विग्रहः**

सीमातीतम् – सीमायाः अतीतम् ।

आवासव्यवस्थायाः – आवासाय व्यवस्था, तस्याः।

अन्यतमः – अनेकेषु एकः।

## पठनप्रवर्तनानि

### पाठभागात् क्रियापदानि चित्वा तान्युपयुज्य नूतनवाक्यानि रचयतु ।

श्रद्धेयाः अंशाः -

क्रियापदज्ञानम्

अर्थावबोधः

वाक्यरचनापाटवम् ।

### कथास्तम्भं क्रमीकरोतु ।

- सर्वे मयूरं समाश्वासितवन्तः ।
- स्वसौन्दर्येण गर्विष्ठः मयूरः सदा सर्वान् परिहसति स्म ।
- वने कश्चन मनोहरः मयूरः अस्ति ।
- मृगाः वनस्य संरक्षणं तेषां कर्तव्यमिति मन्वते ।
- मानवः मयूरस्य नीडं नाशयति ।

श्रद्धेयाः अंशाः -

आशयावबोधः

क्रमीकरणम्

पौर्वापर्यज्ञानम् ।

### पाठभागं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययपदानि चित्वा पट्टिकां पूरयतु ।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| गृहीत्वा | अपहृत्य | स्थापयितुम् |
| | | |
| | | |

श्रद्धेयाः अंशाः -

अर्थावबोधः

पट्टिकाकरणम्

चयनसामर्थ्यम् ।

### उदाहरणानुसारं यदा –तदा उपयुज्य वाक्यानि परिवर्त्य लिखतु ।

उदा – बालः वार्तां शृणोति । भीतिः जायते ।

यदा बालः वार्तां शृणोति तदा भीतिः जायते ।

1. रोगः जायते । आतुरालयं प्रविशति ।
2. कालः गच्छति । परिणामः सम्भवति ।
3. अन्धकारः व्याप्नोति । दृष्टिः मन्दीभवति ।
4. माता क्षीरम् अदात् । बालकः रोदनम् अवसितवान् ।
5. पुत्रस्य सन्देशः आगतः। पिता सन्तुष्टः अभवत् ।

श्रद्धेयाः अंशाः -

आशयावबोधः

वाक्ययोजनासामर्थ्यम्

भाषाशुद्धिः।

### उदाहरणानुसारं लकारं परिवर्त्य लिखतु ।

उदा – गजः मृगान् वदति ।

गजः मृगान् अवदत् ।

1. अरुणिमा गीतं गायति ।
2. फिरोस् शीघ्रं धावति ।
3. कत्रीना वाहनं मन्दं चालयति ।

4. प्रशान्तः चलच्चित्रं पश्यति।

5. आरिफा मित्राय पुस्तकं ददाति।

श्रद्धेयाः अंशाः -

वाक्यपरिवर्तनसामर्थ्यम्

लकारावबोधः

क्रियापदावबोधः।

**अनुबन्धं पठित्वा ग्रन्थकाराणां कृतीनां च पट्टिकां निर्मातु।**

श्रद्धेयाः अंशाः -

पट्टिकाकरणम्

चयनसामर्थ्यम्

आशयावबोधः।

संस्कृतसाहित्यं गद्यपद्यमिश्रैः काव्यैः सम्पुष्टं भवति । पद्यकाव्यानि सुविदितानि खलु । तत्र पञ्चमहाकाव्यानि प्रसिद्धानि। गद्यविभागे च नैके ग्रन्थाः सन्ति। सुबन्धोः वासवदत्ता, दण्डिनः दशकुमारचरितं, बाणभट्टस्य कादम्बरी, हर्षचरितञ्च तत्र प्रसिद्धाः। प्रायशः सर्वे सहृदयाः गद्यसाहित्यस्य आस्वादकाः भवन्ति।

## धातुरूपाणि

वद व्यक्तायां वाचि (भ्वादिः परस्मैपदी सकर्मकः सेट् कर्तरि लङ्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | अवदत् | अवदताम् | अवदन् |
| म.पु. | अवदः | अवदतम् | अवदत |
| उ.पु. | अवदम् | अवदाव | अवदाम। |

रुदिर् अश्रुविमोचने (अदादिः परस्मैपदी अकर्मकः सेट् कर्तरि लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | रोदिति | रुदितः | रुदन्ति |
| म.पु. | रोदिषि | रुदिथः | रुदिथ |
| उ.पु. | रोदिमि | रुदिवः | रुदिमः। |

## नामरूपाणि

मकारान्तः पुल्लिङ्गः 'किम्' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्यां | केभ्यः |
| पञ्चमी | कस्मात् | काभ्यां | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु। |

(सर्वनामशब्दानां सम्बोधनप्रथमारूपाणि न सन्ति। 'किम्' शब्दः सर्वनामगणे अन्तर्भवति।)

## व्याकरणविशेषः

- विना विलम्बम् इत्यत्र 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति सूत्रेण द्वितीया, तृतीया, पञ्चमी वा स्युः।
- 'सञ्चरति स्म' इत्यत्र स्मयोगे भूतानद्यतनपरोक्षे लट्। 'लट् स्मे' इति सूत्रेण।
- 'वानरस्य पृष्ठतः' इत्यत्र 'पृष्ठतः' इत्यस्य योगे षष्ठीविभक्तिः। 'षष्ठ्यसदर्थप्रयोगे' इति सूत्रेण।

## कोशः

वसुधा - सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा।

व्याधः - व्याधो मृगवधाजीवो मृगायुर्लुब्धकोऽपि सः।

वनम् - अटव्यरण्यं विपिनं गहनं काननं वनम्।

**अवाच्यवृत्तिर्हि भूमेः**
**रक्ष्या सन्तुलिता स्थितिः॥**

पाठः ३

# इति वार्ताः



## प्रवेशकम्

प्रिय छात्राः,

भवन्तः वार्तापत्रिकाद्वारा, आकाशवाणी-दूरदर्शन-अन्तर्जालिकाद्वारा च वार्ताः शृण्वन्ति किल। कथम् ईदृशीः वार्ताः सज्जीकुर्वन्ति इति चिन्तितवन्तः किम्? न केवलं संस्कृतभाषावार्ताः अपि तु इतरभाषावार्ताः अन्तर्जालमाध्यमद्वारा लोके सर्वत्र प्रसरन्ति।

## आमुखम्

इदानीन्तनकाले परिस्थितिसमस्याः वर्धमानाः दृश्यन्ते । अतिवृष्ट्या, जलोपप्लवेन, मृत्पातेन, प्रचण्डवातेन च जनजीवनं सामान्येन दुष्करं सञ्जातम् । किमेतेषां कारणम्? कथमेतत् निवारयितुं शक्यते? विभवानां मितोपभोगेन, आगोलतापनस्य न्यूनीकरणप्रवर्तनेन, प्रकृतिसंरक्षणप्रवर्तनेन च पर्यावरणसमस्याः प्रायेण परिहर्तुं शक्यन्ते।

31/07/2024 LIVE

मुख्यवार्ताः ....

वयनाडु मुण्डक्कै चूरल्मला प्रदेशेषु भूस्खलनम् अभवत् । इदानीं मृतजनानां संख्या २२५ सञ्जाता । अप्रत्यक्षेषु १५५ जनानां मृतदेहाः रक्षिजनैः परिदृष्टाः। तिरोभूतेषु २८ जनानामवस्था इतोऽपि ज्ञातव्या । तेषु १७ शिशवश्च अन्तर्भवन्ति ।





इदानीन्तनवार्ताः...शिष्टान् उपलब्धुं परिश्रमः अनुवर्तिष्यते इति मुख्यमन्त्री अवदत्। सैनिकैः बेय्ली सेतुनिर्माणम् आरब्धम्।

01/08/2024 LIVE

तत्समयवार्ताः



स्थलसेना, देशीयदुरन्तनिवारणसेना, अग्निरक्षासेनायाः कोषिक्कोट् कण्णूर् मण्डलस्थाः विशेषप्रशिक्षिताः रक्षासङ्घाश्च रक्षाप्रवर्तने नेतृत्वमावहन्ति । प्रदेशवासिनः इतरे सन्नद्धप्रवर्तकाश्च दुरन्तमुखे सेवननिरताः वर्तन्ते ।....

इदानीन्तनवार्ताः....केडावर् विभागीयान् सारमेयान् उपयुज्यैव तत्र रक्षाप्रवर्तनं समायोजयति ।.......

भवन्तः सर्वे वार्तां दृष्टवन्तः श्रुतवन्तः खलु। लोके ईदृश्यः वार्ताः वर्धन्ते किल ? आगोलतापनं, वननशीकरणं, मृत्खननं, दुर्बलभूप्रदेशेषु बृहन्निर्माणप्रवर्तनानि च पारिस्थितिकदुरन्तानां हेतवः इति अभिज्ञाः वदन्ति। एतासां समस्यानां परिहारार्थं किं किं कर्तुं शक्यते। चर्चां कुर्वन्तु।

| अनुवर्तनीयानि कार्याणि | निरुद्धानि कार्याणि |
|---|---|
| * जैववैविध्यसंरक्षणप्रवर्तनानि। | * पर्वतोपरि अनियन्त्रितं खननम्। |
| * सौरोर्जपरियोजनानां प्रोत्साहनम्। | * वनभूमेः परिवर्तनम्। |
| * कार्बण् रहितेन्धनानाम् उपयोगः। | * जलाशयेषु मलिनवस्तुनिक्षेपः। |
| * विषवायूनां नियन्त्रणम्। | * पलास्तिकवस्तूनां ज्वालनम्। |
| * .............................................. । | * ..........................................। |
| * ............................................ । | * ..........................................। |

छात्राः संघशः चर्चां कृत्वा स्वयमेव विषयेऽस्मिन् प्रबुद्धाः भवन्तु।

**पदच्छेदः**

इतोऽपि = इतः + अपि
रक्षासङ्घाश्च = रक्षासङ्घाः + च
उपयुज्यैव = उपयुज्य + एव
हेतुरिति = हेतुः + इति।

**विग्रहः**

भूस्खलनेन - भुवः स्खलनं भूस्खलनं, तेन।
ज्ञातव्या - ज्ञातुं योग्या।
आगोलतापनं - आगोलं तापनम् आगोलतापनम्।
जलोपप्लवेन - जलस्य उपप्लवेन।

| | |
|---|---|
| मृत्पातेन | - मृदः पातेन (पतनेन)। |
| प्रचण्डवातेन | - प्रचण्डेन वातेन। |
| दुष्करं | - दुःखेन कर्तुं शक्यं दुष्करम्। |
| मितोपभोगेन | - मितः उपभोगः मितोपभोगः, तेन। |
| न्यूनीकरणप्रवर्तनेन | - न्यूनीकरणाय प्रवर्तनं न्यूनीकरणप्रवर्तनम्, तेन। |
| प्रकृतिसंरक्षणप्रवर्तनेन | - प्रकृतेः संरक्षणं प्रकृतिसंरक्षणं, प्रकृतिसंरक्षणाय प्रवर्तनम्, तेन। |

## पठनप्रवर्तनानि

### उदाहरणानुसारं संख्यां संस्कृतभाषया लिखतु।

उदा – 267 – सप्तषष्ट्यधिकद्विशतम्।

354 -.................................।

821 - .................................।

788 - .................................।

987 - .................................।

**श्रद्धेयाः अंशाः -**

संख्यावाचकावबोधः

लेखनसामर्थ्यम्

संख्यास्थानावबोधः।

### घटनाः पत्रिकावार्तारूपेण सज्जीकृत्य अवतारयतु।

1. वाहनापघातः 2. संस्कृतोत्सवः 3. परिस्थितिदिनाचरणम्।

**श्रद्धेयाः अंशाः -**

वार्तारचनासामर्थ्यम्

विषयनिबन्धिता

आशयपूर्णता।

## परिस्थितिसमस्याः तासां निवारणं च इति विषयमधिकृत्य मुद्रावाक्यानि रचयतु ।

श्रद्धेयाः अंशाः -

उचितं मुद्रावाक्यलेखनम्
आशयपूर्णता
आकर्षकत्वम् ।

## अनुबन्धं पठित्वा संस्कृतवार्तामाध्यमानां पट्टिकां पूर्तीकरोतु ।

| |
|---|
| www.ddnews.gov.in |
| www.newsonair.gov.in |
| ................................................ |
| ................................................ |
| ................................................ |
| ................................................ |
| ................................................ |
| ................................................ |

श्रद्धेयाः अंशाः -

वार्तामाध्यमज्ञानम्
पट्टिकापूरणम्
निरीक्षणसामर्थ्यम् ।

## कर्तरि-कर्मणि प्रयोगान् विविच्य मातृकानुसारं लिखतु ।

- अलीना कवितां पठति ।
- अलीनया कविता पठ्यते ।
- बालेन विद्यालयः गम्यते ।
- बालः विद्यालयं गच्छति ।
- शिष्यः गुरुं नमति ।
- शिष्येण गुरुः नम्यते ।
- कर्षकेण कृषिः क्रियते ।
- कर्षकः कृषिं करोति ।

| कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|
| उदा – अनुजः पाठं लिखति । | अनुजेन पाठः लिख्यते । |
| | |
| | |
| | |
| | |

श्रद्धेयाः अंशाः -

प्रयोगावबोधः

विभक्तिपरिचयः

उचितं चयनम् ।

## अनुबन्धः

वार्ताः संस्कृतभाषया ज्ञातुम् इदानीं बह्व्यः सुविधाः सन्ति । अन्तर्जालपुटेषु दूरदर्शनमाध्यमेषु आकाशवाण्यां च वार्ताः उपलभ्यन्ते । तेषां सूचनाः अधः दीयन्ते ।

अन्तर्जालपुटानि -

www.navavani.org.in

www.samprathivarthah.com

www.sudharmasanskritdaily.in

| | |
|---|---|
| आकाशवाण्यां संस्कृतवार्ताः | प्रातः - ६.५५<br>सायं - १८.२० |
| दूरदर्शने संस्कृतवार्ताः | प्रातः - ७.२५ |
| वार्तावलिः | तिथिः - शनिवारः सायं ६.३० |

### धातुरूपाणि

वर्धते - वृध् वृद्धौ आत्मनेपदि लट् रूपाणि ।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | वर्धते | वर्धेते | वर्धन्ते |
| म.पु. | वर्धसे | वर्धेथे | वर्धध्वे |
| उ.पु. | वर्धे | वर्धावहे | वर्धामहे । |

## नामरूपाणि

आकारान्तः स्त्रीलिङ्गः 'वार्ता' शब्दः ।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | वार्ता | वार्ते | वार्ताः |
| सं.प्रथमा | हे वार्ते | हे वार्ते | हे वार्ताः |
| द्वितीया | वार्तां | वार्ते | वार्ताः |
| तृतीया | वार्तया | वार्ताभ्यां | वार्ताभिः |
| चतुर्थी | वार्तायै | वार्ताभ्यां | वार्ताभ्यः |
| पञ्चमी | वार्तायाः | वार्ताभ्यां | वार्ताभ्यः |
| षष्ठी | वार्तायाः | वार्तयोः | वार्तानाम् |
| सप्तमी | वार्तायां | वार्तयोः | वार्तासु । |

## कोशः

| | |
|---|---|
| वार्ता | - वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः। |
| समस्या | - समस्या तु समासार्था किंवदन्ती जनश्रुतिः। |
| हेतुः | - हेतुः कारणं बीजं निदानं त्वादिकारणम् । |

### शब्दकोशः।

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अङ्गीचक्रुः | अङ्गीकृतवन्तः | അംഗീകരിച്ചു | ಅಂಗೀಕರಿಸಿದರು | They accepted |
| अभिज्ञः | विद्वान् | വിദ്വാൻ | ವಿದ್ವಾಂಸ | Expert |
| अवनिः | भूमिः | ഭൂമി | ಭೂಮಿ | The Earth |
| काञ्चनम् | स्वर्णम् | സ്വർണ്ണം | ಚಿನ್ನ | Gold |
| गर्विष्ठः | अहंकारी | അഹങ്കാരി | ಅಹಂಕಾರಿ | Arrogant |
| चेला | वस्त्रम् | വസ്ത്രം | ಬಟ್ಟೆ | Cloth |
| जलोपप्लवः | जलक्षोभः | വെള്ളപ്പൊക്കം | ಪ್ರವಾಹ | Flood |
| तिरोभूतः | अप्रत्यक्षः | കാണാതായവൻ | ಕಾಣೆಯಾದ ವ್ಯಕ್ತಿ | Missing person |
| दर्पणः | आदर्शः | കണ്ണാടി | ಕನ್ನಡಿ | Mirror |

| | | | | |
|---|---|---|---|---|
| दीपपतिः | सूर्यः | സൂര്യൻ | ಸೂರ್ಯ | The Sun |
| धरणी | भूमिः | ഭൂമി | ಭೂಮಿ | The Earth |
| नाकः | स्वर्गः | സ്വർഗ്ഗം | ಸ್ವರ್ಗ | The heaven |
| निकामम् | यथेच्छम् | ധാരാളം | ಇಚ್ಛೆಯಂತೆ | A lot of |
| नियतम् | निश्चयेन | ഉറപ്പായും | ಖಚಿತವಾಗಿ | Surely |
| नीरम् | जलम् | വെള്ളം | ನೀರು | Water |
| पयोदः | मेघः | മേഘം | ಮೋಡ | Cloud |
| पल्लवः | किसलयः | തളിർ | ಚಿಗುರು | Tender leaf |
| पूर्वस्यां दिशि | पूर्वस्मिन् दिग्विभागे | കിഴക്ക് ദിക്കിൽ | ಪೂರ್ವ ದಿಕ್ಕಿನಲ್ಲಿ | In the East |
| प्रचण्डवातः | झञ्झावातः | കൊടുംകാറ്റ് | ಬಿರುಗಾಳಿ | Storm |
| भूषयति | अलङ्करोति | അലങ്കരിക്കുന്നു | ಅಲಂಕರಿಸುತ್ತದೆ | Decorates |
| भूस्खलनम् | भूभ्रंशः | ഉരുൾപൊട്ടൽ | ರೋಲಿಂಗ್ | Landslide |
| माधवः | वसन्तर्तुः | വസന്തകാലം | ವಸಂತಕಾಲ | Spring |
| मृत्पातः | भूस्फोटः | മണ്ണിടിച്ചിൽ | ಭೂಕುಸಿತ | Landslide |
| राति | ददाति | നൽകുന്നു | ಕೊಡುತ್ತಾನೆ | Gives |
| वयते | वयनं करोति | നെയ്യുന്നു | ನೇಯ್ಗೆ ಮಾಡುತ್ತದೆ | Weaves |
| वर्षाकार्मुकम् | ऐन्द्रचापः | മഴവില്ല് | ಕಾಮನಬಿಲ್ಲು | Rainbow |
| वसुधा | भूमिः | ഭൂമി | ಭೂಮಿ | The earth |
| शैवलिनी | नदी | നദി | ನದಿ | River |
| सारमेयः | शुनकः | നായ | ನಾಯಿ | Dog |
| सेतुः | नाकुः | പാലം | ಸೇತುವೆ | Bridge |
| सौरभवाहः | वायुः | കാറ്റ് | ಗಾಳಿ | Wind |
| स्थलसेना | स्थले विन्यस्ता सेना | കരസേന | ಸೈನ್ಯ | Army |

## किमधिगतम्

| पठनप्रवर्तनानि | पूर्णतया स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| बालकविताम् आलपति । | | | |
| कविताभागं चित्वा लिखति । | | | |
| क्रियापदानि सञ्चिनोति । | | | |
| णिजन्तरूपं चित्वा लिखति । | | | |
| समानार्थकपदानि चित्वा लिखति। | | | |
| आशयं लिखति । | | | |
| लघुटिप्पणीं लिखति । | | | |
| नूतनवाक्यानि रचयति । | | | |
| कथास्तम्भं क्रमीकरोति । | | | |
| अव्ययपदानि चित्वा लिखति । | | | |
| वाक्यानि परिवर्त्य लिखति । | | | |
| लकारं परिवर्त्य लिखति । | | | |
| ग्रन्थकाराणां कृतीनां च पट्टिकां रचयति । | | | |
| संख्यां संस्कृतभाषया लिखति । | | | |
| घटनाः वार्तारूपेण लिखति । | | | |
| मुद्रावाक्यानि लिखति । | | | |
| वार्तामाध्यमानां पट्टिकां पूरयति । | | | |
| कर्तरि-कर्मणिप्रयोगान् विवेचयति । | | | |

**सा कला त्वाह्लाददात्री**
**परा च सार्वलौकिकी ।।**



एककम्

# २ आनन्दकम्

## आमुखम्

आलङ्कारिकैः काव्यानां प्रयोजनत्वेन आनन्दप्राप्तिः कथ्यते। अस्मिन्नेकके काव्यकलादीनामेव प्रस्तुतिः क्रियते। अतः अस्य एककस्य नाम आनन्दकम् इति भवति। एककेऽस्मिन् कलाविषय प्रतिपादकाः त्रयः पाठाः सन्ति। गोत्रकलाप्रतिपादकं 'गद्दिका' नाम यात्राविवरणम्, दूतप्रवृत्तिप्रतिपादकः 'धीरो दूतः' नाम नाटकांशः, किरातप्रबन्धात् उद्धृतः अर्जुनस्य पाशुपतप्राप्तिप्रतिपादकः 'सव्यसाची' नामकः काव्यभागश्च। एतेषां पाठभागानामध्ययनेन संस्कृतसाहित्यमधिकृत्य सामान्यज्ञानं लभ्यते।



पाठः ४

# गद्दिका




## प्रवेशकम्

वयं प्रतिदिनं विवधेषु विषयेषु विद्यमानानि व्लोग् दृश्यानि पश्यामः किल। यात्राव्लोग्-दृश्यानि कलारूपावतारणानां व्लोग् च भवद्भिः दृष्टानि वा ? यात्राव्लोग् कथं सज्जीकरोति? कानि कानि कलारूपाणि परिचितानि ? गोत्रकलाः काः?

## आमुखम्

अस्माकं देशः विविधैः कलारूपैः सम्पुष्टः भवति। आह्लाददात्री कला मनसः विमलीकरणाय, संस्कृतीनाम् अवगमनाय, लोकहिताय च सहायिका भवति। आनन्दप्राप्तिः एव आस्वादनस्य परमं लक्ष्यम्। केरलेषु प्रसिद्धानि प्रादेशिककलारूपाणि भवन्ति तेय्यं, पटयणि, मङ्गलंकलि, मरुत्तुकलि, कलंपाट्ट् इत्यादीनि। गोत्रकलाविभागेषु प्रसिद्धं भवति उत्तरकेरलेषु प्रचाल्यमानं गद्दिकाकलारूपम्।



अयि मित्राणि !

ग्रीष्मर्तोः अत्युष्णदिवसाः । ततश्च पर्यावरणे उष्णतरंगव्यापनरूपा समस्या अस्ति ।

भो मित्राणि ! अतः अत्रागताऽस्मि ।

अवगतं वा? कः देशः इति?

गिरिसानुषु केदारसंगीतेन सह परिलसति अयं देशः।

विशालसुन्दरः हरितांशुकधारी च ।

खगकूजनैः मृगनिनदैः शीतसमीरणैश्च नितराम् आकर्षकः भवति ।

यूयं जानीथ किल?

वयनाट् देशः।

देशेऽस्मिन् नैके गोत्रविभागाः सन्ति ।

अधुना अटियसमुदायस्य गद्दिकाकलारूपस्य परिचायनं करोमि । अस्य अनुष्ठानकलारूपस्य प्रयोगेण रोगशमनम् अनर्थनिवारणं च साध्यम् इति तेषां विश्वासः ।


प्रियबान्धवाः !

अत्र मया साकं एकः गद्दिकाकलाकारः अस्ति ।

सामूहिकनेता पी.के. कालन् महोदयः गद्दिकाकलारूपं सर्वजनप्रियमकरोत् इति वयं जानीमः। श्रीमन्! कलारूपमिदं कथम् अवतार्यते ?

'ललितैः वर्णमनोहरैः वेषैः अलंकृताः स्त्रियः, ताभि: साकं स्त्रीवेषधारिणः पुरुषा: चास्मिन् नृत्ते भागभाजः भवन्ति । प्रायेण पुरुषाः वाद्योपकरणानि उपयुज्य गानमालपन्ति' ।

'कीदृशानि गानानि अस्मिन् सन्निवेशितानि' ?



'मलयाल-कन्नटाभाषयोः मिश्ररूपया गोत्रभाषया रचितानि गीतकानि भवन्ति। चुवानि, सिद्ध-प्पन्, मलक्कारि इत्यादिदेवतानां स्तुतिपराण्येव तानि'।

'श्रीमन्! कलारूपेऽस्मिन् कानि कानि वाद्योपकरणानि उपयुज्यन्ते'?

'सुषिरवाद्यानि सन्ति। प्रधानतया तुटिः चीनी च। गद्दिकाकलारूपस्य द्वौ भेदौ स्तः। नाट्टुगद्दिका, पूजागद्दिका चेति। नाट्टुगद्दिकायाः लक्ष्यं तावत् देशक्षेम एव। पूजागद्दिका तु स्वसमुदायक्षेमार्थं च'।

धन्यवादः महोदय !

केरलीयसर्वकारः प्रतिवर्षं द्विवारं गद्दिकोत्सवम् (Gaddika Fest) आयोजयति।

भो सुहृदः! गद्दिकोत्सवं कथमिति पश्यामः।



**पदच्छेदः**

ततश्च = ततः + च

समीरणैश्च = समीरणैः + च

नैकाः = न + एकाः

अहमत्रागतास्मि= अहम् + अत्र + आगता + अस्मि ।

**विग्रहः**

गिरिसानुषु - गिरेः सानुः गिरिसानुः, तेषु ।

हरितांशुकधारी - हरितम् अंशुकं हरितांशुकम् । तत् धरति यः, हरितांशुकधारी ।

वर्णमनोहरैः - वर्णैः मनोहरं वर्णमनोहरम्, तैः ।

## पठनप्रवर्तनानि

### भवद्भिः कृतामेकां यात्रामधिकृत्य दैनिकीं रचयतु ।

श्रद्धेयाः अंशाः -

दैनिकीरचनापाटवम्

आशयपूर्णता

भाषाशुद्धिः।

### पट्टिकां पूरयतु ।

| अहं लिखामि | आवां लिखावः | वयं लिखामः |
|---|---|---|
| .......... ....... | .......... पठावः | ..... ............. |
| ......... भवामि | ....... ........... | ...... ................ |

श्रद्धेयाः अंशाः -

उत्तमपुरुषपदज्ञानम्

वचनावबोधः

अवतारणपाटवम् ।

## उदाहरणानुसारं वाक्यपरिवर्तनं करोतु ।

उदा - दिया - "इतः दूरं गच्छतु"

इतः दूरं गच्छतु इति दिया अवदत्।

१. अध्यापिका - "पाठं सम्यक् पठतु"

२. पिता - "पुत्रि! शीघ्रम् आगच्छतु"

उदा - हेमा - "भवान् कुत्र गच्छति?"

भवान् कुत्र गच्छति इति हेमा अपृच्छत् ।

१. मार्टिन् - "किमर्थं भवान् रोदिति?"

२. हक्किम् - "कदा भवान् नगरं गच्छति?"

श्रद्धेयाः अंशाः -

आशयावबोधः

वाक्यपरिवर्तनसामर्थ्यम्

औचित्यम् ।

## तद्देशीयकलारूपाणां नामावलिं निर्मातु ।

श्रद्धेयाः अंशाः -

तद्देशीयकलारूपाणामवबोधः

निरीक्षणपाटवम्

पट्टिकाकरणम् ।

## पाठभागं पठित्वा गद्दिकामधिकृत्य लघुटिप्पणीं लिखतु ।

श्रद्धेयाः अंशाः -

लेखनसामर्थ्यम्

आशयपूर्णता

भाषाशुद्धिः।

## उदाहरणानुसारं वाक्यं परिवर्तयतु ।

उदा – बालकः ................. सह चित्रालयं गच्छति । (पितामहः)

बालकः पितामहेन सह चित्रालयं गच्छति ।

1. पुत्रः ............... सह क्रीडाङ्गणे क्रीडति । (मित्रम्)
2. नीलिमा ............... समं नृत्यति । (राधिका)
3. जिष्णुः ............. साकं चलच्चित्रं पश्यति । (जनकः)
4. अनुजः ............. सार्धं भोजनं करोति । (अग्रजा)
5. ............. सहितं पठनमपि आवश्यकम् । (क्रीडा)

(सह इत्यर्थे समं, सार्धम्, सहितम्, साकम् च उपयुज्यते ।
सहार्थकशब्दयोगे तृतीया विभक्तिः भवति ।)

श्रद्धेयाः अंशाः -

सहार्थकपदानां प्रयोगावबोधः

तृतीयाविभक्तिज्ञानम्

वाक्यलेखनम् ।

## अनुबन्धः

### नामरूपाणि

**सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः।**

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| सं.प्रथमा | हे मनः | हे मनसी | हे मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनःसु/ मनस्सु । |

## धातुरूपाणि

अस् भुवि (अदादिः परस्मैपदी अकर्मकः सेट् कर्तरि लट्)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | अस्ति | स्तः | सन्ति |
| म.पु. | असि | स्थः | स्थ |
| उ.पु. | अस्मि | स्वः | स्मः । |

ज्ञा अवबोधने (क्र्यादिः परस्मैपदी सकर्मकः अनिट् कर्तरि लट्)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | जानाति | जानीतः | जानन्ति |
| म.पु. | जानासि | जानीथः | जानीथ |
| उ.पु. | जानामि | जानीवः | जानीमः । |

दृशिर् - प्रेक्षणे (भ्वादिः परस्मैपदी सकर्मकः अनिट् कर्तरि लट्)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | पश्यति | पश्यतः | पश्यन्ति |
| म.पु. | पश्यसि | पश्यथः | पश्यथ |
| उ.पु. | पश्यामि | पश्यावः | पश्यामः। |

## व्याकरणविशेषः

सह, समं, सार्धं, साकम् इत्यादीनां पदानां योगे तृतीया विभक्तिः। "सहयुक्तेऽप्रधाने इति सूत्रेण" ।

## कोशः

सानुः - स्नुः प्रस्थः सानुरस्त्रियाम् ।

समीरणः - समीरमारुतमरुज्जगत्प्राणसमीरणाः ।

उष्णः - निदाघ उष्णेपगम उष्ण ऊष्मागमस्तपः।

**न कोऽपि उपहसनीयः खलु ।**

## संख्याः

1 - एकम्
2 - द्वे
3 - त्रीणि
4 - चत्वारि
5 - पञ्च
6 - षट्
7 - सप्त
8 - अष्ट
9 - नव
10 - दश
11 - एकादश
12 - द्वादश
13 - त्रयोदश
14 - चतुर्दश
15 - पञ्चदश
16 - षोडश
17 - सप्तदश
18 - अष्टादश
19 - नवदश
20 - विंशतिः
21 - एकविंशतिः
22 - द्वाविंशतिः
23 - त्रयोविंशतिः
24 - चतुर्विंशतिः
25 - पञ्चविंशतिः

26 - षड्विंशतिः
27 - सप्तविंशतिः
28 - अष्टाविंशतिः
29 - नवविंशतिः
30 - त्रिंशत्
31 - एकत्रिंशत्
32 - द्वात्रिंशत्
33 - त्रयस्त्रिंशत्
34 - चतुस्त्रिंशत्
35 - पञ्चत्रिंशत्
36 - षट्त्रिंशत्
37 - सप्तत्रिंशत्
38 - अष्टत्रिंशत्
39 - नवत्रिंशत्
40 - चत्वारिंशत्
41 - एकचत्वारिंशत्
42 - द्विचत्वारिंशत्
43 - त्रिचत्वारिंशत्
44 - चतुश्चत्वारिंशत्
45 - पञ्चचत्वारिंशत्
46 - षट्चत्वारिंशत्
47 - सप्तचत्वारिंशत्
48 - अष्टचत्वारिंशत्
49 - नवचत्वारिंशत्
50 - पञ्चाशत्

51 - एकपञ्चाशत्
52 - द्विपञ्चाशत्
53 - त्रिपञ्चाशत्
54 - चतुःपञ्चाशत्
55 - पञ्चपञ्चाशत्
56 - षट्पञ्चाशत्
57 - सप्तपञ्चाशत्
58 - अष्टपञ्चाशत्
59 - नवपञ्चाशत्
60 - षष्टिः
61 - एकषष्टिः
62 - द्विषष्टिः
63 -त्रिषष्टिः
64 - चतुःषष्टिः
65 - पञ्चषष्टिः
66 - षट्षष्टिः
67 - सप्तषष्टिः
68 - अष्टषष्टिः
69 - नवषष्टिः
70 - सप्ततिः
80 - अशीतिः
90 - नवतिः
100 - शतम्
1000 - सहस्रम्
100000 - लक्षम्

पाठः ५

# धीरो दूतः




## प्रवेशकम्

संस्कृतोत्सवेषु बह्व्यः प्रतियोगिताः सन्ति । तत्र नाटकस्य प्रमुखं स्थानमस्ति । भवद्भिः कानि नाटकानि दृष्टानि सन्ति? भासस्य नाटकानि परिचितानि वा? भासः, कालिदासः, भवभूतिः इत्यादयः प्रसिद्धाः नाटककाराः भवन्ति ।

## आमुखम्

संस्कृतनाटककारेषु प्रमुखः भवति महाकविः भासः। तेन त्रयोदश नाटकानि विरचितानि सन्ति। तेषु अन्यतमं भवति दूतघटोत्कचम्। कौरवभवने घटोत्कचस्य दूतप्रस्तुतिरेव नाटकस्यास्य प्रतिपाद्यविषयः। अस्मिन् नाटके एक एव अङ्कः विद्यते।

महाभारतयुद्धे अर्जुनस्य पुत्रः अभिमन्युः कौरवैः निर्मिते पद्मव्यूहे मारितः अभवत्। पुत्रविनाशात् पार्थः इतरे पाण्डवाश्च दुःखिताः अभवन्। तद्दृष्ट्वा श्रीकृष्णः वनौकसं भीमसेनपुत्रं घटोत्कचं दूतत्वेन कौरवभवनं प्रेषयति स्म। तत्र धृतराष्ट्रः, दुर्योधनः, दुःशासनः, शकुनिः च आसनस्थाः आसन्।

(ततः प्रविशति घटोत्कचः।)

घटोत्कचः - अये, अयमत्र भवान् धृतराष्ट्रः। पितामह! अभिवादये घटोत्क..., न न, युधिष्ठिरादयश्च मे गुरवो भवन्तमभिवादयन्ति। पश्चात् घटोत्कचोऽहमभिवादये।


धृतराष्ट्रः - एहि पुत्र! एहि।

घटोत्कचः - कल्याणः खल्वत्र भवान्। पितामहमाह भगवांश्चक्रायुधः।

धृतराष्ट्रः - (आसनादुत्थाय) किमाज्ञापयति भगवान् नारायणः?

घटोत्कचः - न न न, आसनस्थेनैव भवता श्रोतव्यो जनार्दनस्य सन्देशः।

धृतराष्ट्रः - (उपविशति) यदाज्ञापयति चक्रायुधः।



घटोत्कचः - पितामह! श्रूयताम्। "एकपुत्रविनाशात् अर्जुनस्य तावत् ईदृशी दुरवस्था। का पुनर्भवतो भविष्यति ? ततः क्षिप्रमिदानीमात्मबलाधानं कुरुष्व' इति।

दुर्योधनः - ह ह ह, हास्यमभिधानम्।

घटोत्कचः - चक्रपाणिना प्रेषितोऽहं वक्ता, त्वं हससि? भवतापि श्रोतव्यो जनार्दनस्य सन्देशः।
'क्षत्रियाणां विनाशः उपस्थितः इत्यवगच्छ। नृपतिशतवधेन भूमेः
लाघवं चास्तु। पुत्रविनाशात् समरमुखे गाण्डीवात् अस्त्रमुक्तिः
फल्गुनस्य नातिभारा' इति।


शकुनिः - यद्येवं वाक्यमात्रेण सर्वक्षत्रवधः साध्यः किम्?

घटोत्कचः - शकुनिरेष व्यवहरति। रे शकुने! त्वमक्षान् विमुञ्च।
समरकर्मणि बाणयोग्यमष्टापदमेव युक्तमिति जानीहि।
तत्र न परदाराहरणं पणः। प्राणा एव पणः।
नाक्षैरत्र केलिः, बाणैरुग्रफलैः अवगच्छ।

दुःशासनः - (सकोपम्) हे दीर्घहस्त ! त्वं प्रमाणं
लङ्घित्वा रूक्षं वदसि। यदि
ते मातृपक्षोग्ररूपो दर्पश्चेत्
वयमपि राक्षसोग्रस्वभावाः
रौद्राः भवामः।

घटोत्कचः - शान्तं शान्तं पापम्।
राक्षसेभ्योऽपि भवन्त एव क्रूरतमाः।
कुतः –
न तु जतुगृहे सुप्तान् भ्रातॄन् दहन्ति निशाचराः
शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः।
न च सुतवधं सङ्ख्ये वृत्तं स्मरन्ति निशाचराः
विकृतवपुषोऽप्युग्राचारा घृणा न तु वर्जिता॥

दुर्योधनः - न त्वं युद्धार्थमागतः, दूतः खलु भवान्?
गृहीत्वा गच्छ सन्देशम्।



| | | |
|---|---|---|
| घटोत्कचः | - | (सक्रोधम्) किं दूत इति मां प्रधर्षयसि? अलं वो व्यवसायेन। ज्याच्छेदाद् दुर्बलोऽभिमन्युर्नाहम्। तिष्ठत्येष घटोत्कचः। उत्तिष्ठतु पुमान् कश्चित् गन्तुमिच्छन् यमालयम्। |
| धृतराष्ट्रः | - | पौत्र! घटोत्कच! मर्षतु मर्षतु भवान्। मद्वचनावगन्ता भव। |
| घटोत्कचः | - | न शक्नोमि रोषं धारयितुम्। तथापि पितामहवचनाद् दूत एवास्मि। किमिति विज्ञाप्यस्तत्र भवान् नारायणः। |
| दुर्योधनः | - | मद्वचनादेवं स वक्तव्यः – 'व्यर्थं किं बहु भाषसे? त्वं पाण्डवैः सह तिष्ठ, ते प्रतिवचः युद्धे सायकैर्दास्यामि' इति। |
| घटोत्कचः | - | पितामह! एष गच्छामि। |
| धृतराष्ट्रः | - | गच्छ गच्छ वत्स! |

## पदच्छेदः

युधिष्ठिरादयश्च = युधिष्ठिरादयः + च
गुरवो भवन्तम् = गुरवः + भवन्तम्
भगवांश्चक्रायुधः = भगवान् + चक्रायुधः
आसनादुत्थाय = आसनात् + उत्थाय
आसनस्थेनैव = आसनस्थेन+ एव
पुनर्भवतो भविष्यति = पुनः + भवतः + भविष्यति
क्षिप्रमिदानीमात्मबलाधानम् = क्षिप्रम् + इदानीम् + आत्मबलाधानम्
प्रेषितोऽहम् = प्रेषितः + अहम्
भवतापि = भवता + अपि
इत्यवगच्छ = इति + अवगच्छ
नातिभारा = न + अतिभारा
यद्येवम् = यदि + एवम्
शकुनिरेषः = शकुनिः + एषः
नाक्षैरत्र = न + अक्षैः + अत्र

बाणैरुग्रफलैः = बाणैः + उग्रफलैः

दर्पश्चेत् = दर्पः + चेत्

विकृतवपुषोऽप्युग्राचाराः = विकृतवपुषः + अपि + उग्राचाराः

वो व्यवसायेन = वः + व्यवसायेन

अभिमन्युर्नाहम् = अभिमन्युः + न + अहम्

विज्ञाप्यस्तत्र = विज्ञाप्यः + तत्र ।

**विग्रहः**

चक्रायुधः - चक्रम् आयुधः यस्य सः।

दुरवस्था – दुष्टा अवस्था ।

आत्मबलाधानम् – आत्मबलस्य आधानम् ।

चक्रपाणिना – चक्रं पाणौ यस्य सः, तेन ।

नृपतिशतवधेन – नृपतीनां शतम् नृपतिशतम्, तस्य वधः, तेन ।

अस्त्रमुक्तिः – अस्त्राणां मुक्तिः।

सर्वक्षत्रवधः – सर्वेषां क्षत्राणां वधः।

दीर्घहस्त – दीर्घौ हस्तौ यस्य, सम्बुद्धौ ।

निशाचराः – निशायां चरतीति, ते ।

विकृतवपुषः – विकृतं वपुः यस्य, ते ।

## पठनप्रवर्तनानि

### नाटकात् सम्बोधनपदानि चित्वा लिखतु ।

श्रद्धेयाः अंशाः -

चयनसामर्थ्यम्
सम्बोधनपदज्ञानम्
अर्थज्ञानम् ।

### नाटकभागं कथारूपेण परिवर्त्य लिखतु ।

श्रद्धेयाः अंशाः -

रचनासामर्थ्यम्

आशयावबोधः

भाषाशुद्धिः।

## अनुबन्धं पठित्वा भासनाटकानां नामानि लिखतु ।

श्रद्धेयाः अंशाः -

निरीक्षणसामर्थ्यम्
औचित्यम्
चयनसामर्थ्यम् ।

## इष्टतमस्य कथापात्रस्य स्वभावचित्रणं करोतु ।

श्रद्धेयाः अंशाः -

भाषाशुद्धिः
औचित्यम्
आशयावबोधः।

## यथाशक्यं प्रश्नान् निर्मातु ।

श्रद्धेयाः अंशाः -

प्रश्ननिर्माणसामर्थ्यम्
प्रश्नवाचकानां प्रयोगसामर्थ्यम्
भाषाशुद्धिः।

## अनुबन्धं पठित्वा नाटकानां तत्कर्तॄणां च पट्टिकां पूरयतु ।

| नाटकस्य नाम | कर्तुः नाम |
|---|---|
| दूतवाक्यम् | ....................................... |
| अभिज्ञानशाकुन्तलम् | ....................................... |
| ....................................... | भवभूतिः |
| ....................................... | शक्तिभद्रः |
| ....................................... | महेन्द्रविक्रमवर्मा |

श्रद्धेयाः अंशाः -

निरीक्षणसामर्थ्यम्
चयनसामर्थ्यम्
पट्टिकापूरणम् ।

## अन्वयः

निशाचराः जतुगृहे सुप्तान् भ्रातॄन् न तु दहन्ति। निशाचराः भ्रातुः पत्नीं शिरसि न तथा स्पृशन्ति। निशाचराः सङ्ख्ये वृत्तं सुतवधं च न स्मरन्ति। विकृतवपुषः अपि उग्रचाराः (निशाचराः) तु घृणा न वर्जिताः।

## भावार्थः

राक्षसाः निद्रां कुर्वतः सोदरान् लाक्षागृहे न ज्वालयन्ति। ते राक्षसाः सहोदरस्य भार्यां तथाविधं शिरसि न स्पृशन्ति। अर्थात् केशाकर्षणं न कुर्वन्ति। राक्षसाः युद्धे संजातं पुत्रवधं कदापि न आघोषयन्ति। यद्यपि राक्षसाः विकृतशरीरिणः कठिनप्रवृत्तिं कुर्वन्तः तथापि ते दयां न परित्यक्ताः भवन्ति।

कौरवाः लाक्षागृहे सुप्तान् पण्डवान् मारयितुं लाक्षागृहस्य दाहनं अकुर्वन्। कौरवाः पाण्डवानां पत्नीं द्रौपदीं केशभारेषु गृहीत्वा बलादाक्षिप्य सभामानीय वस्त्राक्षेपं कृतवन्तः। कौरवाः कुरुक्षेत्रयुद्धभूमौ पुत्रतुल्यं अभिमन्युं निष्करुणं मारयित्वा तद्वृत्तान्तं वारं वारं उक्त्वा आघोषयन्ति स्म। किन्तु एतादृशीः नीचप्रवृत्तीः कदापि राक्षसकुलोत्पन्नाः न कुर्वन्ति। अतः क्रूरप्रवृत्तिषु कौरवाः राक्षसानपि अतिक्रामन्ति इत्यर्थः।

## अनुबन्धः

संस्कृतनाटककारेषु प्रसिद्धः भवति भासः। 'भासो हासः' इति प्रथा सुविदिता एव। तस्य जीवितकालः क्रिस्तोः पूर्वं पञ्चमशताब्द इति कथ्यते। 1912 तमे वर्षे गणपतिशास्त्रिः कूटियाट्टकलारूपे साहित्यरूपेण उपयुज्यमानानि 13 नाटकानि तिरुवनन्तपुरात् परिदृष्टवान्। तेषु भासस्य विश्वप्रसिद्धं स्वप्नवासवदत्तं नाम नाटकम् आसीत्। इतरेषां नाटकानां रचनाशैलीं संवीक्ष्य तान्यपि भासविरचितानीति गणपतिशास्त्रिणा प्रमाणितम्। तानि त्रयोदश नाटकानि 'भासनाटकचक्रम्' इति नाम्ना पश्चात् विश्रुतानि अभवन्। तानि तु अभिषेकनाटकम्, प्रतिमानाटकम्, बालचरितम्, कर्णभारम्, ऊरुभङ्गम्, मध्यमव्यायोगः, पञ्चरात्रम्, दूतघटोत्कचम्, दूतवाक्यम्, स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणम्, अविमारकम्, दरिद्रचारुदत्तम् च।

संस्कृतसाहित्यं विविधैः दृश्यकाव्यैः सुसम्पन्नं भवति। अत्र केषाञ्चित् नाटकानां तेषां कर्तॄणां च नामानि दीयन्ते।

| कर्ता | कृतिः |
|---|---|
| शूद्रकः | मृच्छकटिकम्। |
| कालिदासः | मालविकाग्निमित्रम्, |
| | विक्रमोर्वशीयम्, |
| | अभिज्ञानशाकुन्तलम्। |
| भवभूतिः | मालतीमाधवम्, |
| | महावीरचरितम्, |
| | उत्तररामचरितम्। |
| हर्षवर्धनः | रत्नावली, |
| | प्रियदर्शिका, |
| | नागानन्दम्। |
| भट्टनारायणः | वेणीसंहारम्। |
| विशाखदत्तः | मुद्राराक्षसम्। |
| महेन्द्रविक्रमवर्मा | मत्तविलासप्रहसनम्। |
| शक्तिभद्रः | आश्चर्यचूडामणिः। |
| कुलशेखरः | सुभद्राधनञ्जयम्। |

## धातुरूपाणि

ज्ञा अवबोधने (क्र्यादिः परस्मैपदी सकर्मकः अनिट् कर्तरि लोट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | जानातु, जानीतात्, जानीताद् | जानीताम् | जानन्तु |
| म.पु. | जानीहि, जानीतात्, जानीताद् | जानीतम् | जानीत |
| उ.पु. | जानानि | जानाव | जानाम। |

## नामरूपाणि

सकारान्तः पुंलिङ्गः 'पुंस्' शब्दः।

| | | | |
|---|---|---|---|
| | ए.व. | द्वि.व. | ब.व. |
| प्रथमा | पुमान् | पुमांसौ | पुमांसः |
| सं.प्रथमा | हे पुमन् | हे पुमांसौ | हे पुमांसः |
| द्वितीया | पुमांसम् | पुमांसौ | पुंसः |
| तृतीया | पुंसा | पुंभ्याम् / पुम्भ्याम् | पुम्भिः/पुंभिः |
| चतुर्थी | पुंसे | पुंभ्याम् / पुम्भ्याम् | पुंभ्यः/ पुम्भ्यः |
| पञ्चमी | पुंसः | पुंभ्याम् / पुम्भ्याम् | पुंभ्यः/पुम्भ्यः |
| षष्ठी | पुंसः | पुंसोः | पुंसाम् |
| सप्तमी | पुंसि | पुंसोः | पुंसु । |

## व्याकरणविशेषः

अलं व्यवसायेन – निषेधार्थकस्य अलं शब्दस्य योगे तृतीयाविभक्तिः स्यात् ।


## कोशः

चक्रपाणिः - उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।


दाराः - भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी ।

राक्षसः - राक्षसः कौणपःक्रव्यात्क्रव्यादोऽस्रप आशरः।

वपुः - गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।



**केरलीयसंस्कृतरूपकं कूटियाट्टम् ।**



पाठः ६

# सव्यसाची

## प्रवेशकम्

साहित्यसङ्गीतकलाविहीन:
साक्षात्पशुः पुच्छविषाणहीनः॥

इति श्रुतं वा? यूयं सर्वे कलाकाराः आस्वादकाः च खलु ! कलोत्सववेदिकासु कूटियाट्टम्, चाक्यार्कूत्त् इत्यादिकलारूपाणि भवद्भिः द्रष्टुं शक्यते। चाक्यार्कूत्त् कलारूपे काः कथाः उपयुज्यन्ते ?

## आमुखम्

केरलदेशः विविधैः कलारूपैः सम्पन्नः भवति। ललितकलाः शास्त्रीयकलाः च कलाकेरलस्य गरिमानं प्रकटयन्ति। कथकलि, चाक्यार्कूत्त्, कूटियाट्टम्, कृष्णनाट्टम् इत्यादीनि शास्त्रीयकलारूपाणि भवन्ति। एतासां कलानां बहुशतवर्षीया पौराणिकता अस्ति।

एतासु प्रमुखं चाक्यार्कूत्त्-कलारूपं हास्यरसप्रधानं भवति। इदं कलारूपम् आदौ मन्दिराणां कूत्तम्पलेषु अवतार्यते स्म। नाट्यशास्त्रस्य मार्गनिर्देशानुसारम् एव भवति चाक्यार्कूत्त्-कलारूपस्य आख्यानम्। अस्य कलारूपस्य साहित्यं प्रबन्धः इति कथ्यते। तस्य चम्पूकाव्यमिति नामान्तरम् अस्ति। प्रबन्धकारेषु भोजः, मेल्पुत्तूर् नारायणभट्टपादः च प्रसिद्धौ भवतः। केरलेषु नैके प्रबन्धाः विरचिताः सन्ति।

अस्मिन् पाठभागे मेल्पुत्तूर् नारायणभट्टपादेन विरचितात् किरातप्रबन्धात् केचन श्लोकाः दीयन्ते।

द्यूतक्रीडायां पराजिताः पाण्डवाः चतुर्दश वर्षाणि यावत् वनवासाय गताः। द्वैतवने वसन् युधिष्ठिरः शिवात् पाशुपतास्त्रलाभाय तपः करणाय अर्जुनं प्रेरितवान्। शिवाराधने व्यापृतं तपश्चरन्तम् अर्जुनं वर्णयति :-

गुरोरनुज्ञामधिगम्य भूयः
समेत्य कैलासगिरेः समीपम्।
हरं समाराधयितुं यतात्मा
धनञ्जयस्तत्र तपश्चकार॥

**पदच्छेदः**

गुरोरनुज्ञामधिगम्य = गुरोः + अनुज्ञाम् + अधिगम्य

धनञ्जयस्तत्र = धनञ्जयः + तत्र

तपश्चकार = तपः + चकार।

**विग्रहः**

कैलासगिरेः - कैलासः इति गिरिः कैलासगिरिः, तस्य।

| पदम् | पदार्थः |
|---|---|
| भूयः | - पुनः |
| गुरोः | - गुरुजनस्य |
| अनुज्ञां | - अनुमतिं |
| अधिगम्य | - लब्ध्वा ( संप्राप्य ) |
| यतात्मा | - नियतचित्तः |
| धनञ्जयः | - अर्जुनः |
| कैलासगिरेः | - कैलासपर्वतस्य |
| समीपं | - सकाशम् |
| समेत्य | - प्राप्य |
| हरं | - शिवं |
| समाराधयितुं | - उपासितुं |
| तत्र तपश्चकार | - तत्र तपः अनुष्ठितवान् । |

**भावार्थः**

अनन्तरं ज्येष्ठस्य अनुमतिं स्वीकृत्य प्रयत्नशाली अर्जुनः कैलासपर्वतस्य समीपं प्राप्य परमेश्वरम् आराद्धुं तपश्चकार ।

**कोशः**

गिरिः - अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।

हरः - हरःस्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः।


**नामरूपाणि**

गुरोः - उकारान्तः पुल्लिङ्गः षष्ठी ए.व.।

हरम् - अकारान्तः पुल्लिङ्गः द्वितीया ए.व.।

**धातुरूपाणि**

चकार – डुकृञ् करणे, लिट् परस्मैपदी प्र.पु.ए.व.।



☯ फलेन पर्णेन जलेन वायुना
स्थितिं शरीरस्य स कल्पयन् क्रमात् ।
उपोढकार्श्योऽधिकनिर्मलोऽन्वहं
बभूव पक्षे बहुले यथा शशी ॥

**पदच्छेदः**

उपोढकार्श्योऽधिकनिर्मलोऽन्वहम् = उपोढकार्श्यः + अधिकनिर्मलः + अन्वहम् ।

**विग्रहः**

उपोढकार्श्यः - उपोढं कार्श्यं यस्य सः ।


अधिकनिर्मल: - अधिकतया निर्मलः।

अन्वहम् - अहनि अहनि ।

| **पदम्** | **पदार्थः** |
|---|---|
| फलेन | - फलमात्रेण |
| पर्णेन | - पत्रेण |
| जलेन वायुना | - तोयेन वातेन |
| (इति) क्रमाद् | - (एवं) क्रमेण |
| शरीरस्य स्थितिं | - वपुषः अवस्थां |
| कल्पयन् सः | - कुर्वन् अर्जुनः |
| अन्वहं | - दिने दिने ( दिनं प्रति) |
| बहुले पक्षे | - कृष्णपक्षे |
| उपोढकार्श्यः | - कृशतां प्राप्तः |
| शशी यथा | - चन्द्रः इव |
| अधिकनिर्मलः | - अत्यधिकं विमलः |
| बभूव | - अभूत् । |

**भावार्थः**

फलेन पर्णेन जलेन वायुना च क्रमेण शरीरस्य अवस्थां क्रमीकुर्वन् अर्जुनः कृष्णपक्षे प्रतिदिनं कृशतां प्राप्तः चन्द्रः इव अत्यधिकं निर्मलः अजायत ।



## कोशः

शरीरम् - गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।

शशी - हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः।

## नामरूपाणि

वायुना - उकारान्तः पुल्लिङ्गः तृतीया ए.व.।

स्थितिं - इकारान्तः स्त्रीलिङ्गः द्वितीया ए.व.।

## धातुरूपाणि

बभूव – भू सत्तायाम्, लिट् परस्मैपदी प्र.पु.ए.व.।

उदग्रतेजोऽभिहतैर्महर्षिभि -
र्निवेदिते तादृशि सव्यसाचिनि ।
तपश्चरन्तं तमनन्यदैवतं
विज्ञापयामास गिरीशमम्बिका ॥

**पदच्छेदः**

उदग्रतेजोऽभिहतैर्महर्षिभिर्निवेदिते = उदग्रतेजोऽभिहतैः + महर्षिभिः + निवेदिते

तमनन्यदैवतम् = तम् + अनन्यदैवतम्

गिरीशमम्बिका = गिरीशम् + अम्बिका

तपश्चरन्तम् = तपः + चरन्तम्।

**विग्रहः**

उदग्रतेजोऽभिहतैः - उदग्रैः तेजोभिः अभिहतैः।

सव्यसाचिनि - सव्येनापि (वामहस्तेन) सचति इति सव्यसाची, तस्मिन्।

अनन्यदैवतं - अनन्यं दैवतं यस्य सः, अनन्यदैवतः, तम्।

महर्षिः - महान् च असौ ऋषिः च।

गिरीशम् - गिरेः (कैलासस्य) ईशः गिरीशः, तम्।

| **पदम्** | **पदार्थः** |
|---|---|
| उदग्रतेजोऽभिहतैः | - अत्यधिकैः तेजोयुक्तैः |
| महर्षिभिः | - महामुनिभिः |
| तादृशि | - तथा वर्तमाने |
| सव्यसाचिनि | - अर्जुने |
| निवेदिते | - कथिते (सति) |
| तपश्चरन्तं | - तपसि वर्तमानं |
| अनन्यदैवतं | - इतरेश्वररहितं (शिवमेव ईश्वरत्वेन गणयन्तं) |
| तं | - अर्जुनम् अधिकृत्य |
| अम्बिका | - पार्वती |
| गिरीशं | - शिवं |
| विज्ञापयामास | - कथयामास। |

**भावार्थः**

उग्रतपसः मुनिश्रेष्ठाः अर्जुनस्य कठिनं तपश्चरणं पार्वतीदेवीं सूचितवन्तः। सा च देवी अन्यदेवतानिरपेक्षं तपश्चरन्तं तम् अर्जुनम् अधिकृत्य शिवाय न्यवेदयत्।

## कोशः

अम्बिका - अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका।

## नामरूपाणि

महर्षिभिः - इकारान्तः पुल्लिङ्गः महर्षिशब्दः तृतीया ब.व.।

सव्यसाचिनि - नकारान्तः पुल्लिङ्गः सव्यसाचिन् शब्दः सप्तमी ए.व.।

गिरीशम् – अकारान्तः पुल्लिङ्गः गिरीशशब्दः द्वितीया ए.व.।

## धातुरूपाणि

विज्ञापयामास – वि उपसर्गपूर्वक ज्ञा अवबोधने, लिट् परस्मैपदी प्र.पु.ए.व.।

☯ अन्ते प्रसन्नः पशुपतिः प्रणतं पार्थम् आश्लिष्य समन्त्रं पाशुपतास्त्रं तस्मै प्रदाय तिरोऽभूत्।

## पठनप्रवर्तनानि




### पाठभागस्थानि पद्यानि तालल्यानुसारम् आलपतु।

श्रद्धेयाः अंशाः -

उच्चारणस्फुटता

आशयव्यक्तता

तालबोधः।



### नूतनपदानि चित्वा अर्थं लिखतु।

श्रद्धेयाः अंशाः -

पदपदार्थबोधः

आशयव्यक्तता

आशयग्रहणसामर्थ्यम्।



### पद्यानां गद्यक्रमं लिखतु।

श्रद्धेयाः अंशाः -

क्रियापदग्रहणम्

आशयव्यक्तता

वाक्यघटना।

## पद्यानाम् आशयं लिखतु ।

श्रद्धेयाः अंशाः -

अन्वयक्रमः

आशयावगमनम्

वाक्यघटना ।

## अनुबन्धं पठित्वा पट्टिकां पूरयतु ।

| रामायणप्रबन्धाः | महाभारतप्रबन्धाः |
|---|---|
| | |
| | |
| | |

श्रद्धेयाः अंशाः -

उचितं पूरणम्

आशयावगमनम्

ग्रहणसामर्थ्यम् ।

## गद्यांशं प्रादेशिकभाषायां विवर्तयतु ।

**मेल्पुत्तूर् नारायणभट्टपादः ।**

केरलदेशे लब्धजन्मा पण्डितश्रेष्ठः, कविः, साहित्यकारः च आसीत् मेल्पुत्तूर् नारायणभट्टपादः । केरलेषु निलानद्याः समीपे पोन्नानीदेशे मेल्पुत्तूर् नामके ग्रामे मेल्पुत्तूर्-भवने तस्य जन्म अभूत् । अच्युतप्पिषारटिः तस्य गुरुः आसीत् । प्रक्रियासर्वस्वम्, धातुकाव्यम्, किरातप्रबन्धः, नारायणीयम्, दक्षयागप्रबन्धः, पाञ्चालीस्वयंवरचम्पूः इत्यादयः तेन विरचिताः केचन प्रशस्ताः ग्रन्थाः भवन्ति ।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

क्रमीकरणम्

विवर्तनसामर्थ्यम् ।

# अनुबन्धः

## चाक्यार्कूत्त्

हैन्दवाराधनालयेषु प्रचलिता प्रसिद्धा केरलीयकला भवति कूत्त् । अस्याः अवतारकः भवति 'चाक्यारः' । अतः चाक्यार्कूत्त् इति नाम्ना व्यवह्रियते । पुराणेतिहासादिषु विद्यमानाः कथाः सविस्तरं प्रतिपादयति चाक्यारः। वाचिकः, आङ्गिकः, सात्विकः, आहार्यः चेति चतुर्विधाभिनयाः कलारूपेऽस्मिन् प्रयुज्यन्ते। चाक्यारः प्रेक्षकानपि कथापात्रत्वेन परिकल्प्य मनुष्यसाधारणानि दौर्बल्यानि समकालिकसमस्याः च सरसया रीत्या अङ्गुलीनिर्देशपूर्वकं प्रस्तौति। चाक्यारस्य हास्यप्रयोगसामर्थ्यम् आक्षेपहास्यप्रधानेऽस्मिन् कलारूपे विशेषतः प्रस्तावमर्हति।

दीपालङ्कृतं रङ्गं प्राप्य नम्प्यारः मिषाव् नामके वाद्ये प्रथमं तालक्रमम् आचरति । ततः चाक्यारः प्रविश्य 'चारि' इति विश्रुतं नृत्तमाचरति । पुनः पीठिकायाः अवतारणानन्तरं चम्पूग्रन्थेभ्यः अथवा प्रबन्धेभ्यः स्वीकृतान् श्लोकान् विवृण्वन् स्वपाटवं प्रदर्शयति।

**प्रमुखाः केचन प्रबन्धाः।**

चम्पूरामायणम्, पाञ्चालीस्वयंवरप्रबन्धः, व्यासोत्पत्तिप्रबन्धः, निरनुनासिक प्रबन्धः, कम्परामायणचम्पूः, वामनावतारप्रबन्धः, रावणवधप्रबन्धः, कैलासवर्णन प्रबन्धः, अहल्यामोक्षप्रबन्धः, गजेन्द्रमोक्षप्रबन्धः।

### धातुरूपाणि

डुकृञ् करणे (तनादिः परस्मैपदी सकर्मकः अनिट् लिट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | चकार | चक्रतुः | चक्रुः |
| म. पु. | चकर्थ | चक्रथुः | चक्र |
| उ. पु. | चकार / चकर | चकृव | चकृम। |

भू सत्तायां (भ्वादिः परस्मैपदी सकर्मकः सेट् लिट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | बभूव | बभूवतुः | बभूवुः |

| | | | |
|---|---|---|---|
| म.पु. | बभूविथ | बभूवथुः | बभूव |
| उ.पु. | बभूव | बभूविव | बभूविम। |

वि पूर्व ज्ञा अवबोधने (भ्वादिः परस्मैपदी अनिट् लिट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | विज्ञापयामास | विज्ञापयामासतुः | विज्ञापयामासुः |
| म.पु. | विज्ञापयामासिथ | विज्ञापयामासथुः | विज्ञापयामास |
| उ.पु. | विज्ञापयामास | विज्ञापयामासिव | विज्ञापयामासिम। |

## नामरूपाणि

नकारान्तः पुल्लिङ्गः 'सव्यसाचिन्' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | सव्यसाची | सव्यसाचिनौ | सव्यसाचिनः |
| सं.प्रथमा | हे सव्यसाचिन् | हे सव्यसाचिनौ | हे सव्यसाचिनः |
| द्वितीया | सव्यसाचिनं | सव्यसाचिनौ | सव्यसाचिनः |
| तृतीया | सव्यसाचिना | सव्यसाचिभ्यां | सव्यसाचिभिः |
| चतुर्थी | सव्यसाचिने | सव्यसाचिभ्यां | सव्यसाचिभ्यः |
| पञ्चमी | सव्यसाचिनः | सव्यसाचिभ्यां | सव्यसाचिभ्यः |
| षष्ठी | सव्यसाचिनः | सव्यसाचिनोः | सव्यसाचिनाम् |
| सप्तमी | सव्यसाचिनि | सव्यसाचिनोः | सव्यसाचिषु। |

## व्याकरणविशेषः

तस्मै प्रदाय – दानार्थे चतुर्थी विभक्तिः। 'चतुर्थी संप्रदाने' इति सूत्रेण दानार्थे चतुर्थी भवति।

### शब्दकोशः

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अभिधानम् | कथनम् | പറച്ചിൽ | ಹೇಳಿಕೆ | Speech |
| अभिवादये | नमस्करोमि | ഞാൻ നമിക്കുന്നു | ನಮಸ್ಕರಿಸುತ್ತೇನೆ | I bow |
| अक्षः | द्यूतावयवः | പകിട | ಅಕ್ಷ | Dice |
| अष्टापदम् | द्यूताक्षः | പകിട | ಅಕ್ಷ | Dice |

| | | | | |
|---|---|---|---|---|
| आसनम् | पीठम् | ഇരിപ്പിടം | ಪೀಠ | Seat |
| कल्याणः | कुशली | സുഖമുള്ളവൻ | ಯೋಗಕ್ಷೇಮ | Fine & well |
| क्षिप्रम् | शीघ्रम् | പെട്ടന്ന് | ಬೇಗನೆ | Suddenly |
| घृणा | दया | ദയ | ಕರುಣೆ | Kindness |
| चक्रपाणिः | कृष्णः | ശ്രീകൃഷ്ണൻ | ಶ್ರೀಕೃಷ್ಣ | Lord Krishna |
| चक्रायुधः | कृष्णः | ശ്രീകൃഷ്ണൻ | ಶ್ರೀಕೃಷ್ಣ | Lord Krishna |
| जतुगृहम् | लाक्षाभवनम् | അരക്കില്ലം | ಅರಗಿನ ಮನೆ | Wax house |
| जनार्दनः | कृष्णः | ശ്രീകൃഷ്ണൻ | ಶ್ರೀಕೃಷ್ಣ | Lord Krishna |
| ज्याच्छेदात् | धनुर्गुणविच्छेदात् | ഞാൺ മുറിഞ്ഞതു കൊണ്ട് | ಬಿಲ್ಲಿನ ದಾರ (ಹೆದೆ) ತುಂಡಾದ್ದರಿಂದ | By the break of bow string |
| दर्पः | अहंकारः | അഹങ്കാരം | ಅಹಂಕಾರ | Arrogance |
| दहन्ति | ज्वालयन्ति | കത്തിക്കുന്നു | ಸುಡುತ್ತಾರೆ | Burn |
| दाराः | पत्नी | പത്നി | ಪತ್ನಿ | Wife |
| निनदैः | शब्दैः | ശബ്ദങ്ങളാൽ | ಶಬ್ದಗಳಿಂದ | By Sounds |
| निशाचराः | राक्षसाः | രാക്ഷസന്മാർ | ರಾಕ್ಷಸರು | Monsters |
| नृपतिः | राजा | രാജാവ് | ರಾಜ | The King |
| नैके | अनेके | ധാരാളം | ಅನೇಕ | A lot of |
| पणः | पणवस्तु | പണയവസ്തു | ಪಣಕ್ಕಿಟ್ಟ ವಸ್ತು | Pledged article |
| पर्यावरणे | अन्तरिक्षे | അന്തരീക്ഷത്തിൽ | ಪರಿಸರದಲ್ಲಿ | In the sky |
| पितामहः | पितुः पिता | മുത്തച്ഛൻ | ಅಜ್ಜ | Grandfather |
| प्रतिवचः | प्रत्युत्तरम् | മറുപടി | ಪ್ರತ್ಯುತ್ತರ | Reply |
| प्रधर्षयसि | उपहससि | നീ കളിയാക്കുന്നു | ಕೀಟಲೆ ಮಾಡು | You tease |
| फल्गुनः | अर्जुनः | അർജ്ജുനൻ | ಅರ್ಜುನ | Arjuna |
| वपुः | शरीरम् | ശരീരം | ಶರೀರ | Physique |
| विषाणः | पशुशृङ्गः | കൊമ്പ് | ಹಾರ್ನ್ | Horn |
| श्रोतव्यः | श्रोतुं योग्यः | കേൾക്കേണ്ടത് | ಕೇಳಲ್ಪಡಬೇಕು | To be heard |
| सङ्ख्यम् | युद्धम् | യുദ്ധം | ಯುದ್ಧ | Battle |
| समीरणः | पवनः | കാറ്റ് | ಗಾಳಿಯಿಂದ | Wind |
| हरितांशुकम् | हरितकम्बलम् | പച്ചപ്പട്ട് | ಹಸಿರು ಬಟ್ಟೆ | Green silk |

## किमधिगतम्

| पठनप्रवर्तनानि | पूर्णतया स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| यात्रामधिकृत्य दैनिकीं लिखति । | | | |
| वाक्यपरिवर्तनं करोति । | | | |
| कलारूपाणां नामावलिं रचयति । | | | |
| लघुटिप्पणीं लिखति । | | | |
| सह उपयुज्य वाक्यपरिवर्तनं करोति । | | | |
| सम्बोधनपदानि चित्वा लिखति । | | | |
| नाटकं कथारूपेण परिवर्त्य लिखति । | | | |
| भासनाटकानां नामानि लिखति । | | | |
| स्वभावचित्रणं करोति । | | | |
| प्रश्ननिर्माणं करोति । | | | |
| पद्यानि आलपति । | | | |
| गद्यक्रमं लिखति । | | | |
| आशयं लिखति । | | | |
| प्रबन्धानां पट्टिकां पूरयति । | | | |
| प्रदेशिकभाषया विवर्तयति । | | | |

**समता स्वतन्त्रतायै ।**



एककम्

# ३ आधेयकम्



## आमुखम्

स्वतन्त्रभारतस्य आधारशिला भवति शासनसंविधानम् । तस्य मूल्यानि स्वांशीकृत्य प्रतिपादितम् एककं भवति आधेयकम्। एककेऽस्मिन् समभावनासम्बन्धिनौ द्वौ पाठौ समाकलितौ स्तः । समत्वस्य प्राधान्यं बोधयन् ' समे समाः' नाम अभिमुखपाठः, भारतस्य स्वातन्त्र्यलब्ध्यर्थं जीवत्यागं कृतवतः वक्कम् अब्दुल् खादर् महाशयस्य जीवनचरितसम्बद्धः 'राराज्यमानं ध्रुवतारकम्' इति पाठश्च अन्तर्भवतः। एतयोः पाठयोः अध्ययनेन स्वतन्त्रताविषये जागरूकाः भवाम।



पाठः ७

# समे समाः



## प्रवेशकम्

वृषभशकटेन आगच्छतः अय्यङ्कालिमहोदयस्य प्रसिद्धं चित्रं किलैतत्? सः सन्दर्भः कः? सः किमर्थं प्रयत्नं कृतवान् ? मौलिकान् अधिकारानधिकृत्य भवन्तः किं जानन्ति ?

## आमुखम्

समाजे विविधाः जनाः वसन्ति। उद्योगेन ज्ञानेन धनेन धर्मेण लिङ्गेन एवं बहुप्रकारेण समूहे वैविध्यं दरीदृश्यते। तद्वारा व्यक्तिभेदाश्च वर्तन्ते। यद्यपि सर्वे समाना इति चिन्ता प्रसिद्धा तथापि विविधाः समस्याः अभिमुखीकुर्वन्तः बहवः जनाः अस्मान् परितः सन्ति। तेषां विजयकथाः समाजे ऐक्यम् आनेतुम् उपकारिकाः भवन्ति। तादृशीम् एकां काल्पनिकीं घटनां परिचिनुमः।



(दूरदर्शनस्य साक्षात्कारप्रकोष्ठः। चतुर्भ्यः भागेभ्यः प्रकाशः आगच्छति । पुरतः उभयतः च छायाग्राहिण्यः सन्ति । निर्देशकः सर्वान् निर्दिशति । बाढम्.. सज्जाः ... 3. .2 . . 1 आक्षन्)

(प्रकोष्ठे अवतारकः मेघरागः च सन्निहितौ । मेघरागः अस्य वर्षस्य देशीयसङ्गीतपुरस्कारजेता भवति । तेन सह अभिमुखभाषणमेव सम्प्रति प्रवर्तते ।)

अवतारकः - नियतं बहिरागच्छेत् सत्यमाच्छादितं परम् ।
सदा न शक्यते मेघैः छादनाय दिवापतेः।। सर्वेभ्यः नमस्कारः । देशीयपुरस्कारजेता सङ्गीतसम्राट् मेघरागः अद्य अस्माभिः सह वर्तते । स्वागतम् ।

मेघरागः - नमस्कारः ।

अवतारकः - मेघराग! अस्य मासस्य गूगिल्-अन्वेषणपट्टिकायां प्रथमं नाम भवतः एव । किं प्रतीयते?

मेघरागः - महान् सन्तोषः। अयं विजयः ममेति न चिन्तयामि । प्रत्युत मम देशस्य विजयः इति मन्ये ।

अवतारकः - सामूहिकमाध्यमेषु बहुवारं भिन्नाभिप्रायान् अभिमुखीकृतवानस्ति भवान् ।

अयं पुरस्कारः तेषां  प्रत्युत्तरमिति मन्यते किम् ?

मेघरागः - कदापि न । सर्वेभ्यः अभिप्रायस्वातन्त्र्यं वर्तते । न कोऽपि कस्यापि अधिकारीति मम अभिप्रायः ।

अवतारकः - 'सर्वेषां समाधिकारः' इति आशयं शासनसंविधानेन उन्नीतवतः भीमराव् अम्बेद्करस्य जन्मदेश एवायम् । पुरस्कारप्राप्त्यर्थं भवतः सज्जीकरणं कथमासीत्?

मेघरागः - तदर्थं विशिष्टं सज्जीकरणं किमपि नासीत् ।  एकदा मम सङ्गीतं निषिद्धम् आसीत् । अधुना मम सङ्गीतस्य कृते प्रतीक्षां कुर्वन्तः बहवः श्रोतारः सन्ति । तदेव मे महान् पुरस्कारः ।

अवतारकः - साधु । सङ्गीतस्य का जातिः? को वा देशः? सत्यं खलु ?

मेघरागः - सत्यमेव ।

अवतारकः - स्वरमधुरिमामिमां परिरक्षितुं विशेषः कोऽपि श्रमः वर्तते वा?

मेघरागः - आम्, शरीरस्य इव शारीरस्यापि संरक्षणम् अनिवार्यं खलु । अतः मया उन्मादवस्तूनि वा तादृशं किमपि न उपयुज्यते ।

अवतारकः - भवन्तम् अग्रे आनीतवत्सु कमप्येकं सूचयिष्यति चेत्  कः स्यात्  सः?

मेघरागः - पुरा पञ्चमीम् अक्षराङ्कणं समानेतुम् अय्यङ्कालिः आसीत् । अद्य अस्मान् पुरतो नेतुं अस्माभिः स्वयमेव अय्यङ्कालिः भवितव्यः ।

अवतारकः - साधु । अस्माकं मेघरागस्य विजयोऽयं अस्मादृशानां समेषां प्रेरणादायकः एव । इतोऽपि अग्रे गन्तुं विजयान् अवाप्तुं च भवान् शक्तो भवतु ।



मेघरागः - धन्यवादः ।

अवतारकः - समयाभावात् अत्र समाप्यते । अस्माभिः सह आसीत् मेघरागः। धन्यवादः ।

**पदच्छेदः**

इत्येवम् - इति + एवम्

व्यक्तिभेदाश्च - व्यक्तिभेदाः + च

समाना इति - समानाः + इति

तथापि - तथा + अपि

ऐक्यमानेतुं - ऐक्यम् + आनेतुम्

ममेति - मम + इति

अभिमुखीकृतवानस्ति - अभिमुखीकृतवान् + अस्ति

प्रत्युत्तरमिति - प्रत्युत्तरम् + इति

कोऽपि - कः + अपि

अधिकारीति - अधिकारी + इति

तदेव - तत् + एव

कमप्येकम् - कम् + अपि +एकम्

विजयोऽयम् - विजयः + अयम् ।

**विग्रहः**

विविधस्य भावः - वैविध्यम् ।

ऐक्यम् - एकतायाः भावः।

**अन्वयः**

आच्छादितं परं सत्यं नियतं बहिरागच्छेत् । दिवापतेः छादनाय मेघैः सदा न शक्यते ।

## पठनप्रवर्तनानि



**कोष्ठकात् उचितपदानि चित्वा अधो दत्तं सम्भाषणांशं पूरयतु ।**

(कदा, किम्, कुत्र, कः)

रमेशः - नमस्ते । तव नाम .........?

अजयः - नमस्ते । मम नाम अजयः।

रमेशः - त्वं .......... उत्तिष्ठसि?

अजयः - अहं षड्वादने उत्तिष्ठामि।

रमेशः - त्वं .......... गच्छसि?

अजयः - अहं विद्यालयं गच्छामि।

रमेशः - तव संस्कृताध्यापकः ..........?

अजयः - मम संस्कृताध्यापकः जोसः।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

प्रश्नवाचकपदानामुचितः प्रयोगः

उचितं पूरणम्।

## उत्तरानुसारं कोष्ठकात् उचितपदानि चित्वा प्रश्ननिर्माणं करोतु।

(किमर्थम्, कति, कुतः, कथम्)

प्रश्नः - चलनचित्रं ...............आसीत्?

उत्तरम् - चलनचित्रम् उत्तमम् आसीत्?

प्रश्नः - सः ......... रोदिति?

उत्तरम् - सः भोजनार्थं रोदिति।

प्रश्नः - राघवः ........... आगच्छति?

उत्तरम् - राघवः आपणतः आगच्छति।

प्रश्नः - स्यूते ......... पुस्तकानि सन्ति?

उत्तरम् - स्यूते षट् पुस्तकानि सन्ति।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

प्रश्नवाचकपदानामुचितः प्रयोगः

उचितं पूरणम्।

## आरोग्यसंरक्षणे कर्तव्यानि अकर्तव्यानि च विवेचयतु।

अमिताहारं खादति।

मादकवस्तूनाम् उपयोगं करोति।

प्रतिदिनं व्यायामं करोति।

सुष्ठु निद्रां करोति।

पर्याप्तं जलं पिबति।

अतिशीतलभोज्यानि खादति।

| कर्तव्यानि | अकर्तव्यानि |
|---|---|
| ................ | ................ |
| ................ | ................ |
| ................ | ................ |

श्रद्धेयाः अंशाः -

आशयावबोधः

क्रमीकरणम्

विवेचनसामर्थ्यम्।

## सूचनानुसारं जीवनचरितं लिखतु।

नाम - अय्यङ्कालिः

जन्म - 1863, वेङ्ङानूर्

पितरौ - अय्यन्, माला

प्रशस्तिः - समाजपरिष्कर्ता

प्रधानघटनाः - समाजे अधःस्थितानां विद्याभ्यासार्थं तथा सञ्चारस्वातन्त्र्यार्थं च आन्दोलनम् आयोजितवान्। अधःस्थितेभ्यः जनेभ्यः श्रीमूलं प्रजासभां प्राप्तः प्रथमनेता।

जीवितसन्देशः - विद्याभ्यासेनैव विमोचनं साध्यम्।

मरणम् - 1941 जूण् 18

श्रद्धेयाः अंशाः -

आशयव्यक्तता

जीवनचरितलेखनम्

वाक्यघटना।

### मेघरागम् अवलम्ब्य 'सर्वे समानाः' इत्याशयं विपुलीकृत्य टिप्पणीं लिखतु ।

सूचनाः – जनायत्तराष्ट्रम् – भरणसंविधानम् – अम्बेद्कर् –मौलिकाधिकाराः- सर्वे समानाः – अभिप्रायस्वातन्त्र्यम् ।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

सूचनानां स्वीकारः

वाक्यघटना ।

### पट्टिकां पूरयतु ।

| लट् | लोट् | लृट् |
|---|---|---|
| पठति | ………………… | पठिष्यति |
| भवति | भवतु | ……………… |
| ……………. | करोतु | करिष्यति |

श्रद्धेयाः अंशाः -

लकारपरिचयः

उचितं पूरणम्

पट्टिकाकरणम् ।

## अनुबन्धः

### धातुरूपाणि

मन अवबोधने, (तनादिः आत्मनेपदी सकर्मकः सेट् भावकर्मणोः लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | मन्यते | मन्येते | मन्यन्ते |
| म.पु. | मन्यसे | मन्येथे | मन्यध्वे |
| उ.पु. | मन्ये | मन्यावहे | मन्यामहे । |

सूच पैशुन्ये, (चुरादिः उभयपदी सकर्मकः सेट् कर्तरि लृट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | सूचयिष्यति | सूचयिष्यतः | सूचयिष्यन्ति |
| म.पु. | सूचयिष्यसि | सूचयिष्यथः | सूचयिष्यथ |

| | | | |
|---|---|---|---|
| उ.पु. | सूचयिष्यामि | सूचयिष्यावः | सूचयिष्यामः । |

भू सत्तायाम्, (भ्वादिः परस्मैपदी अकर्मकः सेट् कर्तरि लोट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | भवतु,भवतात् | भवताम् | भवन्तु |
| म.पु. | भव, भवतात् | भवतम् | भवत |
| उ.पु. | भवानि | भवाव | भवाम । |

## नामरूपाणि

मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीय | केन | काभ्यां | कैः |
| चतुर्थी | कस्मै | काभ्यां | केभ्यः |
| पञ्चमी | कस्मात् | काभ्यां | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु । |

(सर्वनामशब्दानां संबोधनप्रथमारूपाणि न सन्ति । 'किम्' शब्दः सर्वनामगणे अन्तर्भवति ।)

## व्याकरणविशेषः

अस्मान् परितः - परितः इत्यस्य योगे द्वितीया विभक्तिः। 'अभितः परितः समयानिकषाहाप्रति योगेऽपि' इति वार्तिकेन ।

**स्वातन्त्र्यमेवामृतम् ।**

पाठः ८

# राराज्यमानं ध्रुवतारकम्





## प्रवेशकम्

वक्कम् अब्दुल् खादर् वर्यस्य चित्राङ्कितायाः पत्रमुद्रायाः (Postage stamp) चित्रं पश्यतु। चित्रे के के सन्ति ? ते कस्मिन् मण्डले प्रसिद्धाः? अस्मिन् केरलीयः कः? स्वातन्त्र्यसमरसेनानीः तेषां प्रवर्तनानि च अधिकृत्य भवन्तः किं किं जानन्ति ?

## आमुखम्

भारतं धर्मनिरपेक्षं राष्ट्रं भवति। भरणघटनायाम् अन्तर्हितेषु मूल्येषु धर्मनिरपेक्षतायाः अतीव प्राधान्यम् अस्ति। सर्वे स्वातन्त्र्यसमरसेनानिनः धर्मभेदं विना स्वातन्त्र्यमिति एकलक्ष्याय यत्नं कृतवन्तः आसन्। तेषु प्रमुखम् एकं केरलीयम् उज्वलनेतारम् अस्मिन् पाठभागे परिचिनुमः।


अयि मित्र !
मम जीवत्यागः अनेकेषां
देशाभिमानिनाम् उदयाय भविष्यति ।
अचिरादेव स्वतन्त्रतायाः शुद्धवायुं
श्वसितुं सर्वेभ्यः अवसरं लभेत ।
वयं स्वतन्त्रभारतस्य पौराः भवाम ।
मयि दुःखितो मा भव । पराजयः
विजयस्य प्रारम्भः भवति ।


(अयं लेख: निधनात् पूर्वं वक्कम् अब्दुल् खादर् महाशयेन स्वसुहृदं प्रति लिखित: भवति ।)

सुभाष् चन्द्रबोस् वर्येण भारतराष्ट्रियसैन्यस्य (INA) नेतृदायित्वं स्वीकृतम् । तदानीम् खादर् मलेष्यादेशे उद्योगं कुर्वन्नासीत् । सः उद्योगं त्यक्त्वा भारतराष्ट्रियसैन्यस्य संघे अङ्गत्वम् अवाप्नोत् । सर्वेषु धर्मेषु वर्तमाना: देशाभिमानप्रचोदिता: जनाः तत्रासन् ।

वैदेशिकशासनम् उन्मूलयितुं नियुक्तस्य रहस्यदलस्य अध्यक्षोऽभवत् वक्कम् अब्दुल् खादर् । दलेऽस्मिन् पञ्च सदस्याः आसन् । भारतं प्रेषिताः ते यदा केरलतीरं प्राप्ता: तदा ब्रिट्टीष् सेनया गृहीताः। तदनन्तरं तेभ्यः  वधदण्ड: विहितः च ।  अनन्तन् नायर् इति मित्रेण सह अब्दुल् खादर् मृत्युदारुणि रोपयित्वा हतः। धीर: अचञ्चल: निर्भीक: स: प्राणान् परित्यजन्नपि ‘जीयात् भारतमाता, नश्येत् ब्रिट्टीष् शासनम्’ इति उदघोषयत् ।



तिरुवनन्तपुरं जिल्लायां वक्कं चिरयन्कीष् प्रदेशे 1917 मेय् मासस्य 25 तमे दिनाङ्के लब्धजन्मा सः न केवलं स्वतन्त्रतासंग्रामे नायकः अपि च कलाकायिकमण्डले प्रगल्भः आसीत् । स्वजीवितेन अनेकेभ्यः वीरपुरुषेभ्यः समरोर्जं प्रदाय सः 1943 सेप्टम्बर् मासस्य 10 तमे दिनाङ्के सर्वेषां स्मृतिमण्डले राराज्यमानं रक्ततारकमभवत् । सर्वे भारतीयाः तं धीरदेशाभिमानिनम् आवेशपूर्वं 'केरलभगत्सिंहः' इति नाम्ना अद्यापि स्मरन्ति ।

**पदच्छेदः**

अचिरादेव = अचिरात् + एव

दलेऽस्मिन् = दले + अस्मिन्

कुर्वन्नासीत् = कुर्वन् +आसीत्

अध्यक्षोऽभवत् = अध्यक्षः + अभवत्

परित्यजन्नपि = परित्यजन् + अपि ।

**विग्रहः**

स्वसुहृदं - स्वस्य सुहृत्, तम् ।

वैदेशिकशासनम् - विदेशे भवः वैदेशिकः, तेषां शासनम् ।

# पठनप्रवर्तनानि

## उदाहरणानुसारं वर्षाणां संख्यां लिखतु।

उदा -1917 - सप्तदशाधिकनवशतोत्तरसहस्रम्।

1914 - ..................................।

1810 - ..................................।

2003 - ..................................।

2024 - ..................................।

श्रद्धेयाः अंशाः -

संख्यावाचकशब्दानामवबोधः

लेखनसामर्थ्यम्

संस्कृते संख्याज्ञानम्।

## 'न केवलम् - अपि च' उपयुज्य वाक्यं परिवर्तयतु।

उदा - राजीवः गायकः भवति। राजीवः नर्तकः भवति।

राजीवः न केवलं गायकः अपि च नर्तकः भवति।

1. आग्नस् विद्यालयं गमिष्यति। आग्नस् ग्रन्थशालां गमिष्यति।
2. अब्दुल् खादर् स्वातन्त्र्यसमरसेनानी आसीत्। अब्दुल् खादर् देशाभिमानी आसीत्।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

वाक्ययोजनासामर्थ्यम्

लेखनसामर्थ्यम्।

## उदाहणानुसारं मुद्रावाक्यानि रचयतु।

उदा - जीयात् मानवमैत्री।

..............................

.................................

श्रद्धेयाः अंशाः

उचिता मुद्रावाक्यरचना

आशयव्यक्तता

आकर्षकत्वम् ।



## अनुबन्धं पठित्वा सूचनाः उपयुज्य जीवनरेखां लिखतु ।

सूचनाः -

जन्म -

पितरौ -

गुरुप्रमुखौ -

प्रसिद्धिः -

पुरस्कारः -

मृत्युः -

श्रद्धेयाः अंशाः -

आशयव्यक्तता

वाचनसामर्थ्यम्

वाक्यघटना ।



## उदाहरणानुसारं वाक्यं परिवर्तयतु ।

उदा - ....................... पूर्वं हस्तप्रक्षालनं करणीयम् । (भोजनम्)

भोजनात् पूर्वं हस्तप्रक्षालनं करणीयम् ।

1. .................. पूर्वं पाठाः पठितव्याः। (स्वापः)
2. ................ पूर्वं विद्यालयः प्राप्तव्यः। (दशवादनम्)
3. ........................ पूर्वं कार्याणि करणीयानि । (गमनम्)
4. ....................... पूर्वं लिखितः लेखः भवति । (मरणम्)
5. ....................... पूर्वं द्विवारं चिन्तनीयम् । (भाषणम्)

पूर्वम् इति पदस्य योगे पञ्चमीविभक्तिः।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

विभक्तिग्रहणम्

अर्थावबोधः ।

## अनुबन्धः

### संस्कृतप्रणयभाजनं पि.टि. कुर्याक्कोस्

गुरुवायूर् साहित्यदीपिका नाम संस्कृतविद्यापीठस्य स्थापकः भवति प्रो. पि. टि. कुर्याक्कोस् महाभागः। सः 1889 तमे वर्षे ओगस्त् मासस्य 6 दिनाङ्के तृश्शूर् जिल्लायाम् ओरुमनयूर् प्रदेशे जनिमलभत। तस्य पितरौ तारुः, एल्या च आस्ताम्। सः बाल्य एव संस्कृतपठनमारब्धवान्। वाग्भटानन्दः, पुन्नश्शेरि नीलकण्ठशर्मा च तस्य गुरुप्रमुखौ आस्ताम् । 1909 वर्षे कुर्याक्कोस् स्वगृहस्य प्रकोष्ठान् धर्मभेदं विना सर्वेभ्यः संस्कृतपठनार्थं प्रददौ। ततः स्वकीयं सर्वमपि संस्कृतविद्यापीठस्य कृते समार्पयत्। 1913 तमे वर्षे संस्कृतविद्यापीठस्य कृते मद्रास् सर्वकलाशालायाः अङ्गीकारः लब्धः। 1979 तमे वर्षे केन्द्रसर्वकारेण विद्यापीठं स्वीकृत्य 'गुरुवायूर् केन्द्रियसंस्कृतविद्यापीठम्' इति नाम प्रदत्तम्। 1923 तमे 'संस्कृतप्रणयभाजनम्' इति पुरस्कारेण समादृतः कुर्याक्कोस् महाभागः संस्कृतभाषायै अमूल्यं योगदानं प्रदाय 1973 फेब्रुवरिमासस्य 23 तमे दिनाङ्के दिवंगतः अभूत्।

### धातुरूपाणि

लभ् प्राप्तौ (भ्वादिः आत्मनेपदी सकर्मकः अनिट् कर्तरि विधिलिङ्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | लभेत | लभेयाताम् | लभेरन् |
| म.पु. | लभेथाः | लभेयाथाम् | लभेध्वम् |
| उ.पु. | लभेय | लभेवहि | लभेमहि। |

उत् +घुषिर् अविशब्दने (भ्वादिः परस्मैपदी सकर्मकः सेट् कर्तरि णिचि लङ्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | उदघोषयत् | उदघोषयताम् | उदघोषयन् |
| म.पु. | उदघोषयः | उदघोषयतम् | उदघोषयत |
| उ.पु. | उदघोषयम् | उदघोषयाव | उदघोषयाम। |

## नामरूपाणि

आकारान्तः स्त्रीलिङ्गः 'सेना' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | सेना | सेने | सेनाः |
| सं.प्रथमा | हे सेने | हे सेने | हे सेनाः |
| द्वितीया | सेनां | सेने | सेनाः |
| तृतीया | सेनया | सेनाभ्यां | सेनाभिः |
| चतुर्थी | सेनायै | सेनाभ्यां | सेनाभ्यः |
| पञ्चमी | सेनायाः | सेनाभ्यां | सेनाभ्यः |
| षष्ठी | सेनायाः | सेनयोः | सेनानाम् |
| सप्तमी | सेनायां | सेनयोः | सेनासु। |

## कोशः

सदस्याः - प्राग्वंशः प्राग्हविर्गेहात्सदस्या विधिदर्शिनः।
सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥

सेना - ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः।

## शब्दकोशः।

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अचिरात् | अविलम्बम् | വൈകാതെ | ಶೀಘ್ರದಲ್ಲೇ | In no time |
| अधिकारः | प्राधिकारः | അവകാശം | ಹಕ್ಕು | Right |
| उद्योगः | कर्म | ജോലി | ಉದ್ಯಮ | Work |
| उन्नीतवतः | घोषितवतः | ഉന്നയിച്ചവന്റെ | ಮೇಲ್ದರ್ಜೆಗೇರಿಸಲಾದ | Of him who had raised |
| उन्मूलयितुम् | नाशयितुम् | നശിപ്പിക്കുവാൻ | ತೊಡೆದುಹಾಕಲು | To destroy |
| उभयतः | पार्श्वद्वयात् | ഇരുവശത്തും | ಎರಡೂ ಕಡೆ | From both sides |
| काल्पनिकीम् | साङ्कल्पिकीम् | സാങ്കൽപ്പികമായ | ಕಾಲ್ಪನಿಕ | Imaginary |
| घटना | सम्भवः | സംഭവം | ಘಟನೆ | Event |

| | | | | |
|---|---|---|---|---|
| छायाग्राहिणी | चित्रग्राहिणी | ക്യാമറ | ಕ್ಯಾಮೆರಾ | Camera |
| दरीदृश्यते | पुनः पुनः दृश्यते | വീണ്ടും വീണ്ടും കാണപ്പെടുന്നു | ಮತ್ತೆಮತ್ತೆ ಕಾಣಿಸಿಕೊ-ಳ್ಳುತ್ತದೆ | Being seen repeatedly |
| निर्देशकः | सूचकः | സംവിധായകൻ | ನಿರ್ದೇಶಕ | Director |
| निधनम् | हननम् | വധം | ನಿಧನ | Assassination |
| निषिद्धः | अवरुद्धः | തടയപ്പെട്ടത് | ನಿಷೇಧಿಸಲಾಗಿದ | Banned |
| त्यक्त्वा | परित्यज्य | ഉപേക്ഷിച്ചിട്ട് | ತ್ಯಜಿಸಿ | Having abandoned |
| दलम् | संघः | കൂട്ടം | ಗುಂಪು | Squadron |
| दण्डः | दण्डनम् | ശിക്ഷ | ಶಿಕ್ಷೆ | Punishment |
| निर्भीकः | भयरहितः | ഭയമില്ലാത്തവൻ | ಭಯವಿಲ್ಲದವ | Fearless |
| पुरतः | अग्रतः | മുൻപിൽ | ಮುಂದಕ್ಕೆ | In front of |
| प्रकोष्ठः | कक्षा | മുറി | ಕೊಠಡಿ | Room |
| प्रत्युत | किन्तु | അല്ലെങ്കിൽ | ಅಥವಾ | But |
| प्रत्युत्तरम् | प्रतिवचनम् | മറുപടി | ಉತ್ತರ | Reply |
| प्रदाय | दत्वा | നൽകിയിട്ട് | ನೀಡಿ | Having given |
| भाति | शोभते | ശോഭിക്കുന്നു | ಶೋಭಿಸುತ್ತದೆ | Shines |
| राराज्यमानम् | प्रशोभमानम् | ജ്വലിക്കുന്ന | ಶೋಭಿಸುವ | Blazing |
| लब्धजन्मा | जन्म प्राप्तवान् | ജനിച്ചവൻ | ಹುಟ್ಟಿದರು | A man who had born |
| वृषभशकटम् | वृषभयानम् | കാളവണ്ടി | ಎತ್ತಿನಗಾಡಿ | Bullock cart |
| वैविध्यम् | विविधभावः | വൈവിധ്യം | ವೈವಿಧ್ಯತೆ | Diversity |
| शासनसंविधानम् | भरणविधानम् | ഭരണഘടന | ಆಡಳಿತ ಸಂವಿಧಾನ | Constitution |
| समाः | तुल्याः | തുല്യർ | ತುಲ್ಯ | Equals |
| समे | सर्वे | എല്ലാവരും | ಎಲ್ಲರೂ | All |
| सम्प्रति | इदानीम् | ഇപ്പോൾ | ಈಗ | Now |
| समाधिकारः | तुल्याधिकारः | തുല്യാവകാശം | ಸಮಾನ ಹಕ್ಕುಗಳು | Equal right |
| साक्षात्कारप्रकोष्ठः | साक्षात्काराय रूपीकृतः कक्षः | അഭിമുഖത്തിനുള്ള മുറി | ಸಂದರ್ಶನ ಪ್ರಕೋಷ್ಠ | Media Room |

## किमधिगतम्

| पठनप्रवर्तनानि | पूर्णतया स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| सम्भाषणांशं पूरयति । | | | |
| प्रश्ननिर्माणं करोति । | | | |
| कर्तव्याकर्तव्यविवेचनं करोति । | | | |
| जीवनचरितं लिखति । | | | |
| टिप्पणीं लिखति । | | | |
| लकारपरिवर्तनं करोति । | | | |
| वर्षाणां संख्यां लिखति । | | | |
| 'न केवलम् – अपि च' उपयुज्य वाक्यं योजयति । | | | |
| मुद्रावाक्यानि लिखति । | | | |
| जीवनरेखां लिखति । | | | |
| वाक्यं पूरयति । | | | |


**आत्मनीव परस्मिन् च**
**स्निह्येदत्रानिशं भुवि ।**

## एककम्

# ४ आदर्शकम्

### आमुखम्

संस्कृतपाठ्यपुस्तकस्य चतुर्थम् एककं भवति आदर्शकम् । एककेऽस्मिन् जीवितविषयसम्बन्धिनौ द्वौ पाठौ समाकलितौ स्तः । मानवगुणानां प्राधान्यं बोधयन् क्रिस्तुभागवतात् उद्धृतः 'निकटस्थः कः?' इति पाठः, नीतिबोधकानां चतुर्णां सुभाषितानां समाहाररूपः 'अहन्यहनि बोद्धव्यम्' इति पाठश्च । एतयोः पाठभागयोः अध्ययनेन अस्मासु मानविकगुणान् पोषयितुं शक्नुमः ।



पाठः ९


# निकटस्थः कः?

**प्रवेशकम्**

'त्वम् आत्मनि इव निकटस्थे च स्निह्य' इति प्रसिद्धं वाक्यं श्रुतवन्तः किम्? कस्य वचनं भवतीदम्? आम्, येशुदेवस्य किल। तस्य जीवनकथां भवन्तः जानन्ति एव।

**आमुखम्**


संस्कृतसाहित्ये केरलस्य योगदानं महदस्ति । केरलीयसंस्कृतकाव्येषु प्रोफ.पि.सि. देवस्यामहाशयस्य (1906 -2006) 'क्रिस्तुभागवतम्' नाम महाकाव्यं नितरां विराजते। 1977 तमे वर्षे प्रकाशितेऽस्मिन् महाकाव्ये येशुदेवस्य सम्पूर्णं चरितम् उपवर्ण्यते। काव्यमिदं 1980 तमवर्षस्य केन्द्रसाहित्य-अक्कादमीपुरस्कारेण समादृतम् । मनुष्यजीवने जाति-धर्म-लिङ्ग-गोत्र-कुलापेक्षया आर्द्रतायाः प्राधान्यमस्ति। क्रिस्तुभागवतमहाकाव्यस्य एकविंशे सर्गे परामृष्टां तादृशीमेकां कथां पठामः।




एकदा श्रीयेशुदेवं प्रति कश्चन नियमनिपुणः अपृच्छत् – 'कः मम निकटस्थः'? इति। तच्छ्रुत्वा क्रिस्तुदेवः कथारूपेण तस्य समाधानमवदत्। यथा -

यूदागोत्रजः कश्चित् कार्यचोदितः सन् येरुशलेम् नगरीतः येरीहुनगरं प्रस्थितवान्। वनराजिभिः दुर्गमं, वन्यजन्तुभिः भयानकं, तस्करबाधितं च तं मार्गम् अवलम्ब्य सः गतवान्। मध्येमार्गं सः सहसा तस्करैः परिवेष्टितोऽभवत्। संभीतः सः प्राणरक्षार्थं दीनं रुरोद। तथापि ते तस्कराः तं विवस्त्रीकृत्य शस्त्रैः विदीर्य धनम् अपहृत्य मृतकल्पं परित्यक्तवन्तः।

अल्पः समयः अतीतः। कश्चित् पुरोहितः पूजानन्तरं देवालयतः स्वगृहं गन्तुं तेन मार्गेण आगतः। मार्गपार्श्वे शयानं रक्तरूषितं दीनं तं पश्यन्नपि निजाननं विमुखीकृत्य सः पुरोहितः अपरपार्श्वेण अगच्छत्। अनन्तरं कश्चित् लेवियगोत्रजः धनिकः तेन मार्गेण समागतः। सोऽपि तं विदीर्णं यूदापुरुषं वीक्ष्य निष्करुणम् अपरपार्श्वेण अधावत्।





ततः कश्चित् समर्यादेशिकः तत्रागतः। करुणामयः सः तं दृष्ट्वा अनुकम्पया उपगम्य भेषजतैलैः क्षतं बबन्ध। अनन्तरं निजवाहनमारोप्य तं पान्थशालाम् अनयत्।

एवं दृष्टान्तमुक्त्वा येशुदेवः नियमनिपुणम् एवम् अपृच्छत् – 'एतेषु कः तस्य निकटस्थः'? इति। 'यः तस्मिन् दयामकरोत् सः' इति नियमनिपुणः प्रत्युत्तरम् अवदच्च।

**पदच्छेदः**

| | |
|---|---|
| परिवेष्टितोऽभवत् | = परिवेष्टितः + अभवत् |
| पश्यन्नपि | = पश्यन् + अपि |
| अवदच्च | = अवदत् + च। |

## विग्रहः

निकटस्थः – निकटे तिष्ठति यः।

कार्यचोदितः – कार्येण चोदितः।

दुर्गमम् – दुःखेन गन्तुं योग्यम्।

निजाननम् – निजम् आननम्।

निष्करुणम् - करुणायाः अभावः यस्मिन्।

नियमनिपुणम् - नियमे निपुणः, तम्।

लेवियगोत्रजः – लेविये गोत्रे जातः।

समर्यादेशिकः – समर्यादेशे भवः।

भेषजतैलैः – भेषजैः तैलैः च।

निजवाहनम् – निजम् वाहनम्।

पान्थशालाम् – पथि साधु पथिकः, तस्य शाला, ताम्।

## पठनप्रवर्तनानि

### कथास्तम्भं क्रमीकरोतु।

- समर्यागोत्रजः दीनं तं मानुषं दयासमेतम् असेवत।
- पुरोहितः निजाननं विमुखीकृत्य अगच्छत्।
- नियमनिपुणः येशुदेवं सन्देहम् अपृच्छत्।
- “यः तस्मिन् दयामकरोत् स एव तस्य निकटस्थः"।
- मध्येमार्गं तस्करैः परिवेष्टितोऽभवत्।
- कश्चित् मानुषः येरुशलेम् नगरीतः येरीहुनगरं प्रति प्रस्थितवान्।

श्रद्धेयाः अंशाः -

क्रमीकरणम्

अर्थावबोधः

पौर्वापर्यसम्बन्धः।

## पाठभागं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तरूपाणि विवेचयतु ।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| श्रुत्वा | अवलम्ब्य | गन्तुम् |
| .................. | ................. | ............. |
| .................. | .................. | ............... |

श्रद्धेयाः अंशाः -

अव्ययानाम् अर्थावबोधः

निरीक्षणसामर्थ्यम्

पट्टिकाकरणम् ।

## उदाहरणानुसारं वाक्यं परिवर्तयतु ।

उदा – गङ्गा ................ प्रवहति । (हिमालयः)

गङ्गा <u>हिमालयतः</u> प्रवहति ।

1. रमेशः ..................... आगच्छति । (छात्रावासः)
2. सैनबा ........................ गच्छति । (पुस्तकशाला)
3. कार् यानं .................. प्रतिष्ठते । (ग्रामः)
4. ..................... वणिक् वस्तूनि आनयति । (नगरम्)
5. .................... चित्रशालायां चित्रप्रदर्शनं वर्तते । (चतुर्वादनम्)

श्रद्धेयाः अंशाः -

आशयव्यक्तता

पदपरिवर्तनसामर्थ्यम्

उचितं पूरणम् ।

## अधो दत्तानि क्त-क्तवतु प्रत्ययान्तपदानि विवेचयतु ।

गतः, प्रस्थितवान्, आगतः, गतवान्, परित्यक्तवन्तः

श्रद्धेयाः अंशाः -

विवेचनसामर्थ्यम्

प्रत्ययान्तपदावबोधः

पट्टिकाकरणम्।

**पाठभागं नाटकरूपेण कक्ष्यायाम् आविष्करोतु।**

श्रद्धेयाः अंशाः -

आशयव्यक्तता

परिवर्तनसामर्थ्यम्

आकर्षकत्वम्।

## अनुबन्धः

### द्वादशगोत्राणि

तदानीन्तनकाले इस्रायेल् देशे द्वादशगोत्राणि आसन्। तेषां नामानि अत्र दीयन्ते। रूबेन्, सिमियोन्, लेवि, जूदा, डान्, नफ्ताली, गाड्, आषर्, इसाचार्, सेबुलुन्, जोसफ्, बेन्चमिन्। एतेषु गोत्रेषु अधिकानि परस्परं कलहायमानानि आसन्। ते गोत्रजाः मिथः भाषणं वा सहायतां वा न अकुर्वन्। तस्मिन् अवसरे एव येशुदेवः दृष्टान्तरूपेण पठभागस्थां घटनां प्रास्तौत्। गोत्रातीतः परस्परस्नेहः समूहे अनिवार्यः, यथाकालं यः सहायहस्तं ददाति स एव निकटस्थः इति जनान् बोधयति स्म येशुदेवः। स एव भवति अस्याः कथायाः सन्देशः।

### धातुरूपाणि

रुदिर् अश्रुविमोचने (अदादिः परस्मैपदी अकर्मकः सेट् कर्तरि लिट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | रुरोद | रुरुदतुः | रुरुदुः |
| म.पु. | रुरोदिथ | रुरुदथुः | रुरुद |
| उ.पु. | रुरोद | रुरुदिव | रुरुदिम। |

## नामरूपाणि

ईकारान्तः स्त्रीलिङ्गः 'नगरी' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | नगरी | नगर्यौ | नगर्यः |
| सं.प्रथमा | हे नगरि | हे नगर्यौ | हे नगर्यः |
| द्वितीया | नगरीं | नगर्यौ | नगरीः |
| तृतीया | नगर्या | नगरीभ्यां | नगरीभिः |
| चतुर्थी | नगर्यै | नगरीभ्यां | नगरीभ्यः |
| पञ्चमी | नगर्याः | नगरीभ्यां | नगरीभ्यः |
| षष्ठी | नगर्याः | नगर्योः | नगरीणाम् |
| सप्तमी | नगर्यां | नगर्योः | नगरीषु। |

## व्याकरणविशेषः


क्तः प्रत्ययः, क्तवतु प्रत्ययः च भूतकालार्थे एव सामान्येन प्रयुज्यते।

## कोशः

भेषजम् - भेषजौषधभैषज्यान्यगदो जायुरित्यपि।

तस्करः - चौरैकागारिकस्तेनदस्युतस्करमोषकाः।


निपुणः – प्रवीणे निपुणाभिज्ञनिष्णातशिक्षिताः।



**सहयोगाच्च स्नेहाच्च**
**भुवि नीतिः प्रवर्तते।**

पाठः १०

# अहन्यहनि बोद्धव्यम्




## प्रवेशकम्

चित्रे कानि पुस्तकानि सन्ति ? तेषु नीतिः प्रतिपाद्यते किल ? नीतिव्यवस्थायाः आवश्यकता का? नीतिज्ञानं कथं सम्पादयितुं शक्यते ? जीवितमूल्यानां विनिमयाय सुभाषितानि महदुपकारकाणि भवन्ति किल । तादृशानां सुभाषितानां दिङ्मात्रपरिचयं कुर्मः ।

## आमुखम्

'पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्' इति प्रथा अस्ति । अनया एव सुभाषितानां महत्त्वं ज्ञातुं शक्यते । कर्तव्यानि अकर्तव्यानि च विविच्य जीविते प्रयोक्तुं तथा नीतिबोधसहिताः भवितुं च प्रेरकाणि चत्वारि सुभाषितानि अस्मिन् पाठभागे परिचिनुमः।

सर्वे नीतिमार्गम् अनुसरन्तमेव अङ्गीकुर्वन्ति। महाभारते शान्तिपर्वणि तादृशः कश्चनः श्लोकः विद्यते यथा -

यान्ति न्याय्यप्रवृत्तस्य
तिर्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं
सोदरोऽपि विमुञ्चति॥

**पदच्छेदः**

तिर्यञ्चोऽपि = तिर्यञ्चः + अपि
सोदरोऽपि = सोदरः + अपि।

**विग्रहः**

न्याय्यप्रवृत्तस्य - न्याय्ये प्रवृत्तः, तस्य।

| **पदम्** | **पदार्थः** |
|---|---|
| न्याय्यप्रवृत्तस्य | - नीतिमार्गे गतस्य |
| तिर्यञ्चः अपि | - जन्तवः अपि |
| सहायताम् | - उपकारिताम् |
| यान्ति | - प्राप्नुवन्ति। |
| अपन्थानम् | - कुमार्गं |
| गच्छन्तं तु | - सञ्चरन्तं तु |
| सोदरः अपि | - सहोदरः अपि |
| विमुञ्चति | - परित्यजति। |

**भावार्थः**

नीतिमार्गेण सञ्चरतः मानवस्य कृते सर्वे जन्तवः अपि सहायकाः भवन्ति। सन्मार्गं परित्यज्य गच्छन् पुरुषः सोदरेणापि त्यक्तः भवति।

**कोशः**

तिर्यञ्चः - ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
पन्थाः - अयनम्वर्त्ममार्गाध्वपन्थानः पदवी सृतिः।

## नामरूपाणि

तिर्यञ्चः - चकारान्तः पुं.प्र.ब.व.।

अपन्थानम् - नकारान्तः पुं.द्वि.ए.व.।

## धातुरूपाणि

यान्ति – या प्रापणे, परस्मैपदी लट्.प्र.पु.ब.व.।

विमुञ्चति – वि उपसर्गपूर्वक मुच् मोचने, परस्मैपदी लट्.प्र.पु.ए.व.।

अपरस्य मानसिकस्थितिं विज्ञाय व्यवहारः करणीयः। हितोपदेशे सत्पुरुषस्य शीलमेवं प्रतिपादयति यथा -

न स्वे सुखे वै कुरुते प्रहर्षं
नान्यस्य दुःखे भवति प्रहृष्टः।
दत्वा न पश्चात्कुरुतेऽनुतापं
स कथ्यते सत्पुरुषार्थशीलः॥

## पदच्छेदः

नान्यस्य = न + अन्यस्य

पश्चात्कुरुतेऽनुतापम् = पश्चात् +कुरुते +अनुतापम् ।

## विग्रहः

प्रहर्षम् – प्रकर्षेण हर्षः, तम् ।

| पदम् | पदार्थः |
|---|---|
| स्वे सुखे | - (यः) स्वस्य सुखे |
| वै प्रहर्षं | - आनन्दम् एव |
| न कुरुते | - न करोति |
| अन्यस्य | - अपरस्य |
| दुःखे | - विषादे |
| प्रहृष्टः | - तुष्टः |
| न भवति | - न वर्तते । |

| | |
|---|---|
| दत्वा | - दानं कृत्वा |
| पश्चात् | - अनन्तरम् |
| अनुतापं | - पश्चात्तापम् |
| न कुरुते | - न करोति |
| सः सत्पुरुषार्थशीलः | - सः सज्जनः (इति) |
| कथ्यते | - अभिधीयते। |

**भावार्थः**

यः स्वस्य सौख्यकाले अत्यधिकं सन्तोषं न प्रकटयति, यः अपरस्य दुःखं दृष्ट्वा आनन्दवान् न भवति, यः दानं कृत्वा पश्चात्तापं न करोति सः सज्जनः इति कथ्यते।

**कोशः**

सुखम् - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्।

अनुतापः – पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि।

**नामरूपाणि**

अनुतापम् – अकारान्तः पुं.द्वि.ए.व.।

**धातुरूपाणि**

कुरुते – डुकृञ् करणे, आत्मनेपदी लट्.प्र.पु.ए.व.।

कथ्यते – कथ प्रकथने, कर्मणि आत्मनेपदी लट्.प्र.पु.ए.व.।

यत् प्राप्यते तदेव देयमिति नियमः नास्ति। प्राप्तं यद्वा भवतु तद्विविच्य उचितमेव देयमिति भागवतपुराणे सूचयति। यथा -

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति॥

**पदच्छेदः**

| | |
|---|---|
| तदेव | = तत् + एव |
| सन्तस्तथा | = सन्तः + तथा। |

**विग्रहः**

वारिमुचः – वारि मुञ्चति यः वारिमुक्, ते।

| पदम् | पदार्थः |
|---|---|
| वारिमुचः | - मेघाः |
| क्षारं जलं | - क्षाररसोपेतं वारि |
| पिबन्ति | - पानं कुर्वन्ति। |
| तदेव | - तदेव जलं |
| मधुरं कृत्वा | - मधुरीकृत्य |
| वमन्ति | - बहिः ददति। |
| तथा | - एवं प्रकारं |
| सन्तः | - सज्जनाः |
| दुर्जनदुर्वचांसि | - दुर्जनानां दुष्टवचनानि |
| पीत्वा च | - निपीय अपि (श्रुत्वा अपि) |
| सूक्तानि | - सुभाषितानि |
| समुद्गिरन्ति | - प्रस्तुवन्ति। |

**भावार्थः**

मेघाः लवणजलं स्वांशीकृत्य शुद्धं जलं वर्षन्ति। एवं प्रकारेण सज्जनाः दुर्जनभाषितानि दुर्वचनानि श्रुत्वा अपि मधुरं भाषणमेव कुर्वन्ति।

**कोशः**

वारिमुक् - धाराधरो जलधरस्तडित्वान्मेघवारिमुक्।

जलम् - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।

**नामरूपाणि**

| | |
|---|---|
| वारिमुचः | - चकारान्तः पुं.प्र.ब.व.। |
| सन्तः | - तकारान्तः पुं.प्र.ब.व.। |
| दुर्वचांसि | - सकारान्तः नपुं.द्वि.ब.व.। |

**धातुरूपाणि**

समुद्गिरन्ति – सम् उत् उपसर्गपूर्वक गॄ निगरणे, परस्मैपदी लट्.प्र.पु.ब.व.।

प्रतिदिनं सर्वैरपि स्वकृतस्य कर्मणः अवलोकनं करणीयमेव । नीतिसारे तादृशः कश्चन श्लोकः विद्यते ।

आयुषः खण्डमादाय
रविरस्तं गमिष्यति ।
अहन्यहनि बोद्धव्यम्
किं मया सुकृतं कृतम् ।।

**पदच्छेदः**

| | |
|---|---|
| खण्डमादाय | = खण्डम् + आदाय |
| अहन्यहनि | = अहनि + अहनि |
| रविरस्तम् | = रविः + अस्तम् । |

| **पदम्** | **पदार्थः** |
|---|---|
| रविः | - सूर्यः |
| आयुषः | - जीवितदैर्घ्यस्य |
| खण्डम् | - भागम् |
| आदाय | - स्वीकृत्य |
| अस्तं | - अस्तमयं |
| गमिष्यति | - यास्यति । |

(अतः) अहनि अहनि – (अतः) प्रतिदिनम्

मया - आत्मना

सुकृतं - सुकर्म

कृतं किम् (इति) -आचरितं वा (इति)

बोद्धव्यम् - चिन्तनीयम् ।

**भावार्थः**

जीवितदैर्घ्यात् एकैकं दिनमपहृत्य सूर्यः प्रतिदिनम् अस्तं गच्छति । अतः प्रत्येकं दिवसे अस्माभिः किं किं साधु कर्म आचरितमिति विचारणीयं भवति इति भावः।

**कोशः**

रविः - भानुर्हंसः सहस्रांशुस्तपनः सविता रविः।

**नामरूपाणि**

आयुषः - षकारान्तः नपुं.ष.ए.व.।

अहनि - नकारान्तः नपुं.ष.ए.व.।

**धातुरूपाणि**

गमिष्यति - गम्लृ गतौ, परस्मैपदी लृट्.प्र.पु.ए.व.।

## पठनप्रवर्तनानि

### सुभाषितानि तालानुसारं आलपतु ।

श्रद्धेयाः अंशाः -

उचितः तालः

अक्षरस्फुटता

अर्थावबोधः।

### आशयानुगुणं सुभाषितं चित्वा लिखतु ।

- प्रतिदिनं कृतानां कर्मणां पुनश्चिन्तनं करणीयम् ।
- न्याय्यप्रवृत्तस्य सहायतायै सर्वे सन्नद्धाः भवन्ति ।
- अपरस्य व्यथायां प्रहृष्टो न भवेत् ।
- दुर्वाक्यं शृण्वन्नपि सज्जनः सूक्तिं प्रतिपादयति ।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

चयनसामर्थ्यम्

विशकलनसामर्थ्यम् ।

### सुभाषितानाम् आशयान् संगृह्य टिप्पणीं लिखतु ।

श्रद्धेयाः अंशाः -

आशयव्यक्तता

लेखनसामर्थ्यम्

वाक्यघटना ।

### क्रियापदानि सञ्चित्य तान्युपयुज्य वाक्यानि रचयतु ।

श्रद्धेयाः अंशाः -

चयनसामर्थ्यम्

लेखनसामर्थ्यम्

भाषाशुद्धिः।

### सुभाषितानि गद्यरूपेण लिखतु ।

श्रद्धेयाः अंशाः

आशयपूर्णता

परिवर्तनसामर्थ्यम्

वाक्यघटना ।

## अनुबन्धः

### अधिकविस्तरः

पूर्वसूरिभिः स्वकीयानुभवैः सम्पादितं ज्ञानं पश्चाद्वर्तिभ्यः लघुवाक्यैः उपदेशरूपेण सुकथितम् । तानि कालातीतानि मूल्ययुक्तानि च भवन्ति । तानि सुभाषितानि इति कथ्यन्ते । संस्कृतसाहित्ये तादृशानि सुभाषितानि बहूनि सन्ति । सुभाषितभण्डागारम्, नीतिसारम्, चाणक्यनीतिः, सुभाषितशतकम् इत्यादीनि पुस्तकानि सुभाषितसमाकलनाय पठतु ।

## धातुरूपाणि

कथ प्रकथने (भ्वादिः आत्मनेपदी सकर्मकः सेट् कर्मणि, लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | कथ्यते | कथ्येते | कथ्यन्ते |
| म.पु. | कथ्यसे | कथ्येथे | कथ्यध्वे |
| उ.पु. | कथ्ये | कथ्यावहे | कथ्यामहे। |

## नामरूपाणि

तिर्यञ्चः – चकारान्तः पुल्लिङ्गः 'तिर्यञ्च्' शब्दः।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्रथमा | तिर्यङ् | तिर्यञ्चौ | तिर्यञ्चः |
| सं.प्रथमा | हे तिर्यङ् | हे तिर्यञ्चौ | हे तिर्यञ्चः |
| द्वितीया | तिर्यञ्चं | तिर्यञ्चौ | तिर्यञ्चः |
| तृतीया | तिर्यचा | तिर्यग्भ्यां | तिर्यग्भिः |
| चतुर्थी | तिर्यचे | तिर्यग्भ्यां | तिर्यग्भ्यः |
| पञ्चमी | तिर्यचः | तिर्यग्भ्यां | तिर्यग्भ्यः |
| षष्ठी | तिर्यचः | तिर्यचोः | तिर्यचाम् |
| सप्तमी | तिर्यचि | तिर्यचोः | तिर्यक्षु। |

### शब्दकोशः

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| आर्द्रता | स्नेहभावः | സ്നേഹഭാവം | ಆರ್ದ್ರತೆ | Love |
| उपगम्य | समीपं गत्वा | സമീപിച്ചിട്ട് | ಹತ್ತಿರ ಹೋಗಿ | Having approached |
| क्षतः | व्रणः | മുറിവ് | ಗಾಯ | Wound |
| तस्करः | चोरः | കള്ളൻ | ಕಳ್ಳ | Thief |
| दृष्टान्तः | उदाहरणम् | ഉദാഹരണം | ಉದಾಹರಣೆ | Example |
| निकटस्थः | पारिपार्श्विकः | അയൽക്കാരൻ | ನೆರೆಯ | Neighbour |
| परिवेष्टितः | परिवृतः | ചുറ്റപ്പെട്ടവൻ | ಸುತ್ತುವರಿದಿದೆ | One who is surrounded by |

| | | | | |
|---|---|---|---|---|
| पान्थशाला | विश्रमकेन्द्रम् | വഴിയമ്പലം | ವಿಶ್ರಾಂತಿ ಕೇಂದ್ರ | Inn |
| बबन्ध | अबन्धयत् | കെട്ടി | ಕಟ್ಟಿದೆ | Tied up |
| शस्त्रम् | निशितम् आयुधम् | മൂർച്ചയുള്ള ആയുധം | ಆಯುಧ | Sharp weapon |
| भेषजम् | औषधम् | ഔഷധം | ಔಷಧಿ | Medicine |
| रुरोद | व्यलपत् | നിലവിളിച്ചു | ಅಳುವುದು | Screamed |
| विदीर्य | विदारणं कृत्वा | മുറിച്ചിട്ട് | ವಿಭಜಿಸಿ | Having cut |

## किमधिगतम्

| पठनप्रवर्तनानि | पूर्णतया-स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| कथास्तम्भं क्रमीकरोति। | | | |
| अव्ययपदानि विविच्य लिखति। | | | |
| वाक्यानि परिवर्त्य पूरयति। | | | |
| क्त-क्तवतु रूपाणि चित्वा लिखति। | | | |
| नाटकरूपेण अवतारयति। | | | |
| सुभाषितानि आलपति। | | | |
| सुभाषितानि चित्वा लिखति। | | | |
| आशयान् संगृह्य टिप्पणीं लिखति। | | | |
| क्रियापदानि सञ्चित्य वाक्यानि रचयति। | | | |
| गद्यक्रमं लिखति। | | | |

# अक्षरमाला

| स्वराक्षराणि | | | | |
|---|---|---|---|---|
| अ | आ | इ | ई | उ |
| ऊ | ऋ | ॠ | ऌ | ए |
| ऐ | ओ | औ | अं | अः |

| व्यञ्जनाक्षराणि | | | | |
|---|---|---|---|---|
| खरः | अतिखरः | मृदुः | घोषः | अनुनासिकः |
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |

| अन्तःस्थाः | | | |
|---|---|---|---|
| य | र | ल | व |

| ऊष्माणः | | | |
|---|---|---|---|
| श | ष | स | ह |

| संयुक्ताक्षराणि | | | | |
|---|---|---|---|---|
| क्ष | त्र | ज्ञ | श्र | द्य |

## माहेश्वरसूत्राणि

अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्

## വിഭക്ത്യർത്ഥങ്ങൾ

അതെന്നു പ്രഥമയ്ക്കർത്ഥം
ദ്വിതീയയ്ക്കതിനെപ്പുനഃ
തൃതീയ ഹേതുവായിട്ടു
കൊണ്ടാലോടുകൂടെയെന്നപി.
ആയിക്കൊണ്ടു ചതുർത്ഥീ ച
സർവ്വത്ര പരികീർത്തിതാ
അതിങ്കൽനിന്നുപോക്കെക്കാൾ
ഹേതുവായിട്ടു പഞ്ചമി.
ഇക്കുമിന്നുമുടെ ഷഷ്ഠി
യ്ക്കതിന്റെ വെച്ചുമെന്നപി
അതിങ്കലതിൽവെച്ചെന്നും
വിഷയം സപ്തമീ മതാ

| | |
|---|---|
| പ്രഥമ | - അത് |
| ദ്വിതീയ | - അതിനെ, അതിനോട്, അതിലേക്ക് |
| തൃതിയ | - അതിനെ കൊണ്ട്, അതിലൂടെ, അതിനാൽ |
| ചതുർഥി | - ആയിക്കൊണ്ട്, അതിനു വേണ്ടി |
| പഞ്ചമി | - അതിൽ നിന്ന് , അതിനേക്കാൾ, അത് കാരണം |
| ഷഷ്ഠി | - ക്ക് ന് ന്റെ ഉടെ |
| സപ്തമി | - അതിങ്കൽ , അതിൽ വച്ച് , ആവിഷയത്തിൽ |

# Notes

## ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

# മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക, സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും, ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

## കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

### നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in

ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***